॥ ओ३म् ॥

'न तच्छस्त्रैर्न
नागेन्द्रैर्न ह्यैर्न पदातिभिः।
कार्यं संसिद्धिमभ्येति
यथा बुद्ध्या प्रसाधितम्।'
(पंचतंत्र)

कष्टेन हि गुणग्रामं
प्रगुणी कुरुते मुनिः।
ममता राक्षसी सर्वं भक्षयत्येकहेलया॥
(अध्यात्मसार - 08/03)

RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937 DL(E)-20/5534/2024-26

सत्यनिष्ठा जयेल्लेखनी निर्भया

Posting Date.:
4-5, 19-20 of Every Month

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३११०८६७५१

ई-मेलः sanskritsamvad@gmail.com वेवसाइटः www.sanskritsamvad.com मूल्यम्-रू. १०/-

॥ ओ३म् ॥

त्यक्त्वा धर्मं च लोभं च
मोहं चोद्यममास्थिता।
युध्यध्वमनहङ्कारा
यतो धर्मस्ततो जयः॥
(महाभारत, भीष्म पर्व - 21/11)

रङ्कं करोति राजानं राजानं
रङ्कमेव च।
धनिनं निर्धनं चौव निर्धनं
धनिनं विधिः ॥ चाणक्यनीति)

卐 वर्षम्-१३ 卐 अंकः-२२ (३१०) नवदेहली 卐 १६ मईमासः २०२४तः ३१ मईमासः २०२४ पर्यन्तम् 卐 विक्रमसंवत्-२०८१ 卐 सृष्टिसंवत्-१,९६,०८,५३,१२४ 卐 पृष्ठम्-८


## भगवन्नारायणस्य जयकारेण बद्रीनाथधाम्नः कपाटाः उद्घाटिताः

बद्रीनाथ। श्रद्धालूनां महता उत्साहेन अस्य धाम्नः कपाटोद्घाटनं जातम्। अनेन सह चार धाम यात्रा अपि शुभारब्धा। बद्रीनाथ धाम्नः पूर्वं धामत्रयस्य गंगोत्री , यमुनोत्री केदारनाथ इत्येषां द्वाराणि पूर्वमेव समुद्घाटितानि। तत्र प्रथमां पूजां प्रधानमंत्रिणो नरेंद्र मोदिनो नाम्ना अभवत्। प्रथमेह्नि 20000 तः अधिक भक्ताःपूजाम् अर्चनां च कृतवन्तः। परंपरानुसारं जोशीमठतः 25 किलोमीटरदूरं तपोवन ग्रामे स्थितं बद्री धाम, उरगमपर्वतद्रोणीस्थितं बंसी नारायणकपाटमपि बद्री धाम्ना सह उघटतिस स्थानीय महिलाभिः पारंपरिक संगीतेन सह एषा परंपरा अनुष्ठीयते। सर्वप्रथमं मंदिरे देवतानां कोषाध्यक्षः कुबेरः, नारायणसखा उद्धवः गाडूघड़ा च मंदिरे प्रविशन्ति। गर्भ गृहे कपाटोद्घाटनोत्तरम् अखंड ज्योति दर्शनं भवति । ततः महालक्ष्मीऽ मंदिरे विराजिता। सममेव कुबेरः उद्धवश्च यथा स्थानं विराजितौ।








## शास्त्रकौशलं विशिष्टग्रन्थस्य अध्ययनाय अत्यन्तम् आवश्यकम्-कुलपतिः प्रो वरखेड़ी

दिल्ली। केन्द्रीय संस्कृत विश्वविद्यालयस्य(दिल्ली) कुलपतिः प्रो श्रीनिवास वरखेड़ी अखिल भारतीय शास्त्र प्रशिक्षणाय 90 चयनितानां अभ्यर्थिनां प्रशिक्षणं केन्द्रीय संस्कृत विश्वविद्यालयस्य राजीव गांधि




परिसरे, श्रृंगेर्यां, श्री रघुनाथ कीर्ति परिसरे,देव प्रयागे जयपुर परिसरे च सुनिश्चितम् । तेभ्यः हार्दिकवध पिनानि यच्छन् भारत सर्वकाराय आभारं व्यक्तीकृतवान् स उल्लेखनीयम् ,अष्टादशी परियोजनान्तर्गतस्य कार्यक्रमस्यास्य श्रीगणेशः जातः गया है। कुलपतिना उक्तं विश्वविद्यालयेन प्रतिवर्षं संस्कृत शास्त्र संरक्षणाय संबर्धनाय च यद् अखिल भारतीय शास्त्र स्पर्धा समायोजनं क्रियते स तामेव परम्परां सुदृढां कर्तुं महत्त्वपूर्णप्रकल्पः। परम्परायामस्यां छात्रच्छात्राः स्वस्य पूर्णसज्जतया भागं गृहीतुं संस्कृत शास्त्रे समग्रविश्वम् आधिक्येन चमत्कृतां कर्तुं शक्नुयात् कार्यक्रमस्य मुख्यातिथिः ,कर्णाटक विश्वविद्यालयस्य पूर्व कुलपतिः प्रो. के. ई. देवनाथन, कथितवान् यत् एतन्नवोन्मेषी शास्त्र प्रशिक्षणं संस्कृतमहत्तम् इतोपि सम्यक्तया स्थापयिष्यति । प्रो ब्रज भूषण ओझा ( बनारस हिन्दू विश्वविद्यालयः) कथितवान् यत् प्रशिक्षण कार्यक्रमे देशस्य मान्या संस्कृत विद्वान शास्त्र पिपासवः छात्रच्छात्राः प्रशिक्षणं दातुं कुलपतिना श्रीनिवास वरखेडीवर्येण नामिताः। शान्ति पाठेन कार्यक्रमस्य समापनमभूत् ।

## पतंजलियोगपीठे "गर्भ-संस्कार-संतति-सर्जनम्" विषये एकदिवसीया राष्ट्रिया कार्यशाला आयोजिता

हरिद्वारम्। पतंजल्यायुर्वेदमहाविद्यालयचिकित्सालयः पतंजल्यनुसंधानपतंजलि विश्वविद्यालयः इत्यनयोःसंयुक्त तत्वाधाने "गर्भसंस्कारं" प्रत्याधारिता एक दिवसीया राष्ट्रिय कार्यशाला "संतति सृजनम्" इत्यस्य आयोजनं पतंजलि विश्वविद्यालयस्य सभागारे सम्पन्नम्। कार्यशालोद्घाटनं परम पूज्य स्वामी रामदेवः, आयुर्वेद शिरोमणि आचार्य बालकृष्णः विशिष्टातिथि डॉ. (प्रो.) कल्पना शर्मा तदीयायुर्वेदक्षेत्रे उल्लेखनीय कार्येभ्यः 'लाइफटाइम अचीवमेंट अवॉर्ड' प्रदत्तम्।



कार्यक्रम प्रारंभे पूज्य स्वामी रामदेवमहाराजः कथितवान् यद् भारत भूमि गौरवशालिनी आदर्श माताभिः सुसमृद्धा तासु जीजाबाई, पुतलीबाई, मदालसा, सीता च याभिः सुसंस्कारित सन्तत्ये आकारं दत्तवत्यः। पूज्य आचार्य बालकृष्णः मातृत्व महिमानम् उल्लिखन्नुक्तवान् यत् वेदिकग्रंथेषु षोडषसंस्काराः वर्णिताः । यत्र संस्कारत्रयं गर्भाधानं, पुंसवनं सीमंतोन्नयनं चेति जन्मतः पूर्वं भवति। यत्संयोजनं भावी शिशोः मातापितृभ्यां गर्भ रक्षा-भावनया क्रियते।

विशिष्टवक्ता डॉ. (प्रो.) कल्पना शर्मा कथितवती यद् आयुर्वेदस्य प्रमुखम् उद्देश्यं स्वास्थ्यं रोगनिरोधःतदुपचारश्च। आयुर्वेदः सा संजीवनी या जीवनाय आध्यात्मिक दृष्ट्या अलौकिक शक्तिन प्रददाति। कार्यक्रमस्य संचालनं डॉ. सुमन सिंहः डॉ. ग्रेसी सोकिया कृतवत्यौ धन्यवाद ज्ञापनं कुर्वन् प्रधानाचार्यः आयुर्वेदमहाविद्यालयस्य डॉ अनिल कुमारः कथितवान् यत् एतादृश व्याख्यानमाला: जीवनं समग्रतया जीवितुं नवीन दृष्टिं प्रददाति। अवसरेस्मिन्पतंजलि अनुसंधान संस्थानस्य वैज्ञानिकाः उपस्थिताः आसन्।

# व्यावसायिक-पाठ्यक्रममाध्यमेन सम्भविष्यति कौशल- विकाशः-एम.सी.पाण्डेयः

रामनगरम्। पीएनजी राजकीय- स्नातकोत्तर-महाविद्यालये रामनगरे विद्यार्थिनः स्नातक-स्नातकोत्तर-कक्षासु अध्ययनेन सह उद्योगपरक- पाठ्यक्रमेषु प्रवेशं प्राप्य कौशल- विकाशं कुर्वन्तु इत्युद्दिश्यैव एषा सङ्गोष्ठी सञ्जाता। प्राचार्यः प्रोफेसर एम.सी.पाण्डे महोदयः महाविद्यालयस्य व्यावसायिक- अध्ययन-केन्द्रस्य




सङ्गोष्ठ्यां विभाग-संयोजकान् सम्बोधयन् वक्ति यत् व्यावसायिक-पाठ्यक्रमाः युवजनैः सह अवश्यमेव संयुताः भवेयुः। सङ्गोष्ठी इत्यत्र मईमासस्य 31 दिनाङ्कं यावत् विभिन्न- व्यावसायिक-पाठ्यक्रमेषु ऑनलाईनमाध्यमेन प्रवेशाय लक्ष्यं निर्धारितं वर्तते। सेंटर फॉर वोकेशनल स्टडीज इत्यस्य समन्वयकः डॉ सुमन कुमारः अस्मिन् सन्दर्भे छात्र-छात्राभ्यः सूचनां प्रसारयन् वदति यत् टूरिज्म स्टडीज, ट्रैवल एण्ड टूरिज्म मैनेजमेण्ट, ईको टूरिज्म,ऑफिस मैनेजमेंट एंड सेक्रेटेरियल प्रैक्टिस, कम्प्यूटराईज्ड एकाउण्टिंग, योग एण्ड अल्टरनेट थैरेपी,स्नातकोत्तर-योगश्च इत्यादिषु महत्त्वपूर्णेषु उपाधि-प्रमाणपत्र-आदि पाठ्यक्रमेषु प्रवेशप्राप्त्यर्थं समर्थ- पोर्टल-इत्यत्र सर्वप्रथमं पञ्जीकरणमावश्यकमस्ति तदनन्तरं च प्रवेशार्थमुपस्थितिः आवश्यकी। महाविद्यालयस्य विद्यार्थिनः द्विधा उपाधिं प्राप्तुं शक्नुवन्ति। डॉ. निवेदिता वदति यत् पर्यटनक्षेत्रे सञ्चालिताः त्रिविधाः कार्यक्रमाः टूरिस्ट गाइड, रिसोर्ट हॉस्पिटैलिटी इत्यादिषु क्षेत्रेषु उद्योगावसराः समुपलब्ध ाः भवितुमर्हन्ति।एम.ए. योगस्य संयोजकः डॉ मूलचन्द्रेण उच्यते यत् गतवर्षे योगविभागीयाः विद्यार्थिनः उत्तराखण्डराज्यात् बहिरपि पञ्जाबप्रान्ते सर्वकारीय-उद्योगं प्राप्तवन्तः।अस्यां व्यावसायिकसङ्गोष्ठ्यामध ोलिखित-संयोजका उपस्थिता आसन् ,तत्र डॉ. सुमन कुमारः,डॉ. निवेदिता अवस्थी, डॉ. मूलचन्द्र शुक्लः, डिप्लोमा इन ऑफिस मेनेजमेंट इत्यस्य डॉ. दीपक खाती, डिप्लोमा इन ईको-टूरिज्म अस्य डॉ. कृष्णा भारती, डिप्लोमा इन टूरिज्म स्टडीज इत्यस्य डॉ. जे.पी.त्यागी,डिप्लोमा इन कम्प्यूटराईज्ड अकाउण्टिंग अस्य डॉ. ममता भदोला जोशी च।

# संस्थानेन सञ्चाल्यमाना मईमासीया आभाषिककक्षा समारब्धाः-विनयश्रीवास्तवः

लखनऊ - (राधाशर्मा) विगतेभ्यश्चतुःपञ्चवर्षेभ्यः ओनलाइन कक्षाणां माध्यमेन सहस्रशः शिक्षार्थिभ्यो लाभप्रदात्र्याः उत्तर प्रदेश संस्कृत संस्थानस्य ओनलाइन प्रशिक्षण पाठ्यक्रम निर्माण योजनायाः अन्तर्गता संचालित संस्कृत भाषा शिक्षण कक्षा कोरोना कालान्निरन्तरं निर्बाधगत्या प्रचलति । सद्यः एव योजनागणेन चतुर्वर्षात्मकं प्रतिवेदनं शासनाय निवेदितम्। ओनलाइन कक्षासु प्रतिमासं सहस्रं शिक्षार्थिनः प्रतिबद्धता पूर्वकं संस्कृत भाषाम् अध ीयन्ते । व्यस्ततम दिनचर्यायां समयाभावे च संस्कृतपठनेच्छुभ्यशिशक्षार्थिभ्यः एतत्सर्वं किञ्चन वरदानमेव । योजना प्रमुखः प्रधानसहायको भगवान सिंह चौहानः कथितवान् यद् कार्यकारिअध्यक्षस्य आई० ए० एस० जितेन्द्रकुमारस्य, (अपरमुख्यसचिव भाषा विभागः) प्रेरणया मान्यनिदेशकस्य विनयश्रीवास्तवस्य निर्देशने प्रशासनिकयोः डॉ. दिनेशकुमारमिश्रः, जगदानन्दझा इत्यनयोः परामर्शेन प्रशिक्षणप्रमुखस्वयं सुधि ष्ठकुमारमिश्रस्य मार्गदर्शने इमाः कक्षाः प्रतिमासं प्रचलन्ति । यासां योजनागणेन (धीरजमैठाणी, राधाशर्मा, दिव्यरञ्जनः च ) निरीक्षणं प्रबन्धनं च क्रियते। अस्मिन् मासे एकपञ्चाशत्कक्षासु 2254 शिक्षार्थिनः आमंत्रिताः । येषु 1103 समुपस्थाय संस्कृतभाषाशिक्षणे रुचिम् आवहन्ति। सर्वे शिक्षार्थिनः सोत्साहं पठेयुः । आगामीन्यानां कक्षाणां सञ्चालनमितोऽपि सम्यक्तया आकर्षकरूपेण च कर्तुं संस्थानं प्रयत्नशीलं भविष्यति । कार्यालयपरतया सर्वेक्षकः महेन्द्रपाठकः, लेखाकारः नितेशश्रीवास्तवः, आशुलिपिकः वीरेन्द्रतिवारी, कनिष्ठसहायिका पूनममिश्रा, समन्वयकोऽनिलगौतमः ऋषभपाठकः, शान्तनुमिश्रः, शिवमगुप्ता च सहकुर्वन्तो विद्यन्ते। योजनासंवाहकाः सर्वे प्रशिक्षकाः पूर्णपरिश्रमेण शिक्षणकार्यं कुर्वन्ति। सर्वैश्शिक्षार्थिभिः पूर्णमनोयोगेन संस्कृतम् अधीयते इत्येव योजनायाः वास्तविकी सार्थकता अस्ति।



# अक्षरधाम-मन्दिरे भक्तिविषयकं बहुभाषीयं राष्ट्रियं कविसम्मेलनम्

नव दिल्ली ऐषमः मई मासस्य पञ्चम्यां अक्षरधाम-मन्दिरे भक्तिविषयकं बहुभाषीयं राष्ट्रियं कविसम्मेलनम् आयोजितम्। अक्षरधाममन्दिरस्य बी.ए.पी.एस. स्वामीनारायण-शोध-संस्थाने एकं




भव्यं कविसम्मलेनम् अनुष्ठितम् अभूत्। "केशव काव्य कलरव 2024" इत्याख्यैस्मिन् कवि-सम्म्मेलने शिक्षा-जगतः नैके प्रसिद्धाः दिग्गजाः उपातिष्ठन्त।

अस्मिन् बहुभाषीये सम्मेलने अतिथित्वेन जवाहरलाल-नेहरू-विश्वविद्यालयस्य वरिष्ठः संस्कृत प्राध्यापकः प्र. सी. उपेन्द्र रावः, जामिया मिलिया इस्लामिया विश्वविद्यालयस्य संस्कृतविभागस्य अध्यक्षः, प्र. गिरिश-चन्द्रपन्तः, लाल बहादुर-शास्त्रि-राष्ट्रिय-संस्कृत-विश्वविद्यालयस्य आचार्यः प्र. भगीरथी नंदा दिल्ली विश्वविद्यालयस्य अङ्गभूतस्य हिन्दू महाविद्यालयस्य संस्कृताचार्यः डॉ. सुनील जोशी चा उपस्थिताः आसन्।

कार्यक्रमस्य आरम्भः स्वामीनारायण भजनस्य सङ्गीतमयेन वचनामृत-श्रवणेन भगवतः महिमागानेन च साकं विहितः। एतस्य अनन्तरं, काव्यपाठस्य आयोजनात् प्राक् परम्परानुपालनेन मुनिवत्सलदास-स्वामिनः (स्वामिनारायण अक्षरधाम्नः प्रभारी), सर्वनिवासदास स्वामिनः दिव्यमूर्तिदास स्वामिनश्च पावनोपस्थितौ दीप-प्रज्वालनस्य मंगलोद्घाटनम् अभूत्। कार्यक्रमस्य पूर्वस्मिन् सत्रे बी.ए. पी.एस. स्वामिनारायण-शोध-संस्थानस्य सहनिदेशककेन डॉ. ज्ञानानन्ददास स्वामिना भाषायाम् एकं स्वागत-वक्तव्यं प्रस्तुतम् प्रस्तुत। ततः परं काव्य प्रस्तुतिः समारब्धा। अग्रे प्रतिभागिभिः जनैः गुरुमहिमा, परमेश्वरकृपा, गुरुमहत्त्वं, परमेश्वर-प्रेम, गुरु-कृपा, आध्यात्मिकता चेति विषयेषु निज-निज-कविताः प्रस्तुताः प्रतिभागिनाम् उत्कृष्ट-प्रस्तुतयः पुरस्कृतीकृताः। पुरस्कारेषु कमलः श्रीमाली सर्वोत्तमः कविः, 'कात्यायनी' डॉ. पूर्णिमा शर्मा सर्वोत्तमा कवयित्री, डॉ. युवराज भट्टराई-वर्यः प्रथम पुरस्कारः , रघुवीर सिंह मुलथानः द्वितीय-पुरस्कारः, अंजू तिवारी तृतीय पुरस्कारः, अक्षज श्रीवास्तवश्च सर्वोत्तमः बाल-कविः एंजल दियोरा सर्वोत्तमा बालिकाकवयित्री इति रूपेण क्रमशः पुरस्कृताः अभूवन्।

# बालानां शिक्षणे महान्तं सहयोगं निर्वर्तयति स्वामिरामानुजसंस्कृताध्ययनकेन्द्रम्

देशराज शर्मा

12/5/2024 तमे दिनाङ्के जगद्गुरुस्वामिरामानुजाचार्यभगवत्पादशङ्कराचार्यजयन्तीमुपलक्ष्य स्वामिरामानुजसंस्कृताध्ययनकेन्द्रेण आयोजिता विद्वत्संगोष्ठी । कार्यक्रमेऽस्मिन् नैकेभ्यः विश्वविद्यालयेभ्यः नैकाः छात्रा अध्यापकाश्च समागताः। कार्यक्रमस्य शुभारम्भहेतोः वैदिकमङ्गलम् श्रीहरिहर-वैदिक-गुरुकुलस्य




छात्रैः, कृष्णस्तुतिपुरःसरं स्वरलयात्मकं लौकिकमङ्गलं च इन्द्रप्रस्थमहाविद्यालयस्य छात्रया कृष्णया समाचरितम्।

कार्यक्रमेस्मिन् डॉ श्रीयतिराजसापकोटामहाभागाः मुख्यातिथिपदम्, आचार्यरामचन्द्ररेग्मिमहाभागाः सारस्वतातिथिपदम्, अनुरागत्रिपाठीमहाभागाः विशिष्टातिथिपदमलमकुर्वत।

ततश्च आदिशेषावतारस्य स्वामिश्रीरामानुजाचर्यस्य विषये विशिष्टव्याख्यानं, भक्तिसिद्धान्तस्य, प्रपत्तिमार्गस्य वानरीबैडालीवृत्त्योश्च विषये मर्मज्ञत्वेन प्रत्यपादि डॉ यतिराजमहाभागैः। तदनु अनुरागत्रिपाठीमहाभागाः भगवत्पादशङ्कराचार्यस्य ईश्वस्य च अवतारविषये सुमहान्तं विचारं व्यचरन्। आचार्येण धर्मस्य स्थापनं ईश्वरेण धर्मस्य स्थापनमुभयोः को भेद इत्यपि व्याचरन् । ततश्च रामचन्द्ररेग्मीवर्याः धर्मस्य सुमहद् विवरणं अददन्।

अद्यतनीयाः युवानः धर्मस्य, शास्त्रस्य, संस्कारस्य, संस्कृतेश्च शिक्षां कथं प्राप्नुयुः इति विचारमकुर्वन्। इदं स्वामिरामानुजसंस्कृताध्ययनकेन्द्रं प्रत्युत्पन्नमतीनां बालानां शिक्षणे महान्तं सहयोगं निर्वर्त्स्यति इत्यादि विषयांश्च बोधितवन्तः। एवं च अध्यक्षमहोदयेन लक्ष्मणरामानुजदासेन रामरामानुजयोः विषये ऐक्यप्रतिपादनपुरस्सरम् अध्यक्षीयोद्बोधनम् धन्यवादज्ञापनं च विहितम्। सर्वान्ते च स्वामिरामानुजसंस्कृताध्ययनकेन्द्रस्य सचिवाः कुशलशर्ममहाभागाः कृष्णयजुर्वेदीय शान्तिपाठेन कार्यक्रममिमं समापायन्।

## श्रीमातङ्गी, बैद्यनाथभट्टमते काव्यदीप प्रभा इत्यनयोर्विमोचनं जातम्

जयपुरम् । अक्षय तृतीयावसरे उपसहाचार्य विरचित श्रीमातङ्गी एवं वैद्यनाथ भट्टमते काव्यप्रदीप प्रभा इत्यनयो: गोनेर स्थिते सत्यायतन पहाड़ी बाबा आश्रमे श्री श्री 1008 श्री भुवनेश्वरानंदजी महाराजस्य श्री



हस्ताभ्यां विमोचनं जातम् । 10 महाविद्यासु मातंगी -उपासना विशेष रूपेण वाक् सिद्धये क्रियते। संपादक: डॉ मनीषा शर्मा कथितवान् यत् श्री मातंगी स्त्रोत प्रकाशनं पंडित मोतीलाल जोशी प्राच्य विद्या अनुसंधान केंद्रेण राजस्थान शिक्षक प्रशिक्षण विद्यापीठेन च कृतम्। मातंगी स्त्रोत पाठ: पूज्य मुनि जिन विजय श्री: राजस्थान पुरातन ग्रंथ माला माध्यमेन प्रकाशित:। मूल पाठं मत्वा केषांचन पाठभेदानां परिवर्तनं दूरीकृत्य स्वतंत्र रूपेण मातुस्संपूर्ण स्वरूपस्य श्री मातंगी स्रोते संपूर्ण वर्णनं कृतम् । वैद्यनाथ भट्टेन प्रदीप टीकाया: टीका रूपेण काव्य प्रदीप प्रभा रचिता। मम्मत कृत काव्यतत्वालोचनस।य समालोचनया सह स्वमंतव्यस्य प्रस्तुतीकरणं काव्य तत्वालोचन संदर्भित महत्वपूर्ण प्रश्नानां समाधानं विविध शंकानां निराकरण दृष्ट्या वैद्यनाथ भट्ट कृत प्रभा टीका पठनीया। यत् प्रकाशनं विश्व गुरुदीप आश्रम शोध संस्थान द्वारा कृतम्। अवसरेस्मिन् विद्यापीठ सचिव: डॉ राजकुमार जोशी, डॉ सुभद्रा जोशी,डॉ राजपाल शर्मा इत्येतान् समेत्य अन्ये महानुभावा: उपस्थिता:।

## ग्रीष्मावकाशे संस्कृतरुचि: वर्धते जनेषु

वार्ताहर: शशिकान्त:

मईमासे उत्तरप्रदेशसंस्कृतसंस्थालखनऊद्वारा २०२४ संस्कृतभाषाशिक्षणकक्षासु जीवनस्य सर्वकामना: स्पृशन्तीं देववाणीं शिक्षितुम् अतीव जनसम्मर्द: वर्धते ग्रीष्मावकाशे संस्कृतरुचि: अपि वर्धते जनेषु च। प्रारम्भे बीनया संस्थानगीतिकानन्तरं सरस्वतीवन्दना नीत्या कृता। नूतनसत्रेऽस्मिन् संस्कृतभाषाशिक्षणकक्षायां प्रशिक्षुभि: संस्कृतसूक्ष्मता: ज्ञाता:। पत्रिकापठनार्थं, मित्रालापार्थं, गीतापठनपाठनार्थं, परीक्षार्थं, सम्भाषणार्थञ्च इतोऽपि भिन्नोद्देश्यं साकारीकर्तुं बहुभ्य: क्षेत्रेभ्य: राज्येभ्यश्च प्रशिक्षव: समागता:।

उपक्रमोऽयं बहुमोदमानोऽस्ति।

आधुनिककाले संस्कृतभाषाया: उपयोगिता: उक्त्वा शास्त्रसंरक्षणे संस्कृतस्य मुख्यभूमिका प्रस्तावितासीत् । भाषाविज्ञानानुसारं संस्कृतस्य महत्त्वमुक्तम्। जिलागाजियाबादस्य संस्थानप्रशिक्षक शशिकांत महोदयेन कक्षैषा संचाल्यते। द्वितीयस्तरस्य कक्षैषा सायं ०८:०० - ०९:०० वादनपर्यन्तं प्रचलति। शशिकान्त महोदय: प्रशिक्षून् वर्णमालाज्ञानं, संस्कृतस्य सूक्ष्मतां च पाठितवान। कक्षायामुपस्थितेषु प्रखर,सुधा,ज्योति, ममता, मंजु,वीरेन्द्र इत्यादिभि: प्रशिक्षुभि: स्वविचारा: प्रकटिता:। प्रतिभागिभ्य: धन्यवादं दत्त्वा प्रशिक्षणसंयोजक: श्री धीरज मैठाणी संस्थाया: योजनाया: विषये विस्तरेण उक्तवान् । स: अवदत् यत् प्रतिमासं २ त: ३ सहस्रं छात्रा: संस्कृतभाषां शिक्षन्ते। एता: कक्षा: उत्तरप्रदेशसंस्कृतसंस्थानस्य निदेशक: विनयश्रीवास्तव:, प्रधानपदाधिकारी डॉ. दिनेशमिश्र:, सर्वेक्षक भगवानसिंह:, प्रशिक्षणप्रमुख: सुधिष्ठ मिश्र:, कक्षानिरीक्षणं समन्वयक दिव्य रंजन: राधा शर्मा च कृतवन्त:। ऑनलाइन माध्यमद्वारा संचालितकक्षायामन्ते कक्षान्ते प्रतिदिनं प्रतिभाप्रदर्शनमपि भवति च। अत्र ५० छात्रै: सह, संस्थाया: पदाधिकारिण:, किशोरी राधे, वैभव, निशा, मीना इत्यादय: उपस्थिता: आसन्। एतासु कक्षासु अन्ते परीक्षा अपि भविष्यति । उत्तीर्णवद्भ्य: प्रमाणपत्राणाम् वितरणस्य व्यवस्थापि अस्ति। एतावता बहव: उपकृता:। विशेषत: ये विद्यालयादिषु ज्ळज/च्ळज इत्यनयो: कृते सज्जतां कुर्वन्ति, तेऽप्यत्र पठितुमागच्छन्ति । एतया योजनया अग्रेऽपि उपकृता: भविष्यन्ति एव । ये एतां नि:शुल्क- कक्षामागन्तुकामा: ते जना: "sanskritsambhashan.com" इति लिंक उद्घाट्य तत्र स्वानुकूलतया समयं चित्वा स्वस्य नामांकनं कारयितुं शक्नुवन्ति । ये प्रथमस्तरं पठितवन्त: विशेषत: तेभ्य: अन्येभ्यश्च द्वितीयस्तरस्य प्रशिक्षणमपि संस्थानेन दीयते। परीक्षायाम् ३३% उत्तीर्णवद्भ्य: शिक्षार्थिभ्य: ७५% उपस्थितेभ्य: प्रशिक्षुभ्य: प्रमाणपत्राणि अपि दूरवाणीसन्देशमाध्यमेन प्रेषणव्यवस्था अस्ति। मासे अस्मिन् संस्थानद्वारा अधुना श्गृहे-गृहे संस्कृतम्श इत्यनया योजनयापि प्रचार: भवति ।

नि:शुल्क नामांकन कर्तुमिच्छन्ति तेभ्य: नामांकनलिंक "https:// sanskritsambhashan.com / seco nd_level_reg.php" इत्यस्ति ।

# श्रीमद्भागवतमहापुराणलक्षणानि

-डॉ. संदीप शर्मा
सहायक आचार्य दर्शन
गोरक्षनाथ राजकीय संस्कृत
महाविद्यालय नाहन, सिरमौर हिमाचल प्रदेश।

भगवत्प्रोक्तमिदं तत्त्वात्मकं भागवतं लब्ध्वा प्रजापतिरेवास्य पुराणविधास्वरूपं रचयाञ्चकार। अस्मिन्नेव काले लक्षणविन्यासोऽप्यत्र दृग्गोचरतामायाति, तद्यथा-

**प्रजापतिर्धर्मपतिरेकदा नियमान्यमान् ।**
**भद्रं प्रजानामन्विच्छन्नातिष्ठत् स्वार्थकाम्यया।।**
**तं नारद: प्रियतमो रिक्थादानामनुव्रत: ।**
**शुश्रूषमाण: शीलेन प्रश्रयेण दमेन च।।**
**मायां विविदिषन् विष्णोर्मायेशस्य महामुनि: ।**
**महाभागवते राजन् पितरं पर्यतोषयत् ।।**
**देवर्षि: परिपप्रच्छ भवान् यन्मानुपृच्छति ।**
**तस्माद इदं भागवतं पुराणं दशलक्षणम्।।**
**(श्रीमद्० ३-९-३९-४३)**

श्रीमद्भागवतस्य द्वितीयस्कन्धस्य दशमे तमेऽध्याये भागवतस्य सर्गादिदशलक्षणानां

वर्णनमेवं समुपलभ्यते-

**अत्र सर्गो विसर्गश्च स्थानं पोषणमूर्तय: ।**
**मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रय: ।।**
**(श्रीमद्० २-१०-१)**

इदानीं श्रीमद्भागवतानुसारमेव भागवतस्य दशलक्षणानि व्याक्रियन्ते -

**१. सर्ग:**

**भूतमात्रेन्द्रियधियां जन्म सर्ग उदाहत: ।**
**ब्रह्मणो गुणवैषम्याद् विसर्ग: पौरुष: स्मृत: ।।**
**(श्रीमद्० २-१०-३)**

भगवत्प्रेरणया त्रिगुणात्मिकायां प्रकृतौ सत्त्वादित्रिगुणसङ्क्षोभादाकाशादिपञ्चमहाभूतानां,

शब्दादिपद्धतन्मात्राणामिन्द्रियाहङ्कारमहतत्त्वानां चौत्पत्तिरेव सर्ग:। इत्थं भागवतस्य प्रथमलक्षणं, 'कथमेकतत्त्वान्नानात्वमुद्र वतीति' प्रश्नस्य समाधानं विधते, येन वैविध्यस्य मूलानुसन्धानं कुर्वन्तोवयं 'नेतिनेति'पद्धत्या तत्कारणभूतं ब्रह्मस्वरूपं विज्ञाय वीत शोका विज्ञाय वीतशोका भवेम इति ।

**२. विसर्ग:**

पुरुषस्य (वासनाविशिष्टस्य) सृष्टिरेव विसर्ग: 'विसर्ग: पौरुष: स्मृत:' इति लक्षणातृ। अत्र पुरुषरूपेण हिरण्यगर्भ एव गृहीत:। तेन जीवानां वासनापरिणतिमवधार्य, नानात्वरूपेण सृष्टिचक्रस्य यत्-प्रवर्तनं क्रियते तदेव विसर्ग इति सञ्ज्ञया व्यपदिश्तये। प्रथम लक्षणं मूलतत्त्वस्यामूर्तकारणानुसन्धानस्य, द्वितीयमिदं च विसर्गलक्षणं मूर्तकारणानुसन्धास्य प्रक्रियां बोधयति। चराचरं सम्पूर्णमपि मूर्तिमज्जगत् भगवत्स्वरूपमेवेति लक्षणस्यास्य पार्यन्तिकं तात्पर्यम्।

३. स्थानम् -

'स्थितिर्वैकुण्ठविजय:' इत्यस्य लक्षणम्। प्रतिक्षणं विनाशमुपगच्छन्तीं संसृतिमिमां यो धारयति यश्च नियमै: समुपबध्नाति, तत्सर्वकारणस्याकुण्ठस्वरूपस्य परमेश्वरस्य माहात्मयनिरुपणमेव स्थिति: स्थानं वेति। अयमाशय: असत्यभूते नानात्वप्रपञ्चमूले जगति सत्यभूता एकैव भगवत्सता वर्तते यथैवेदं सर्वमसत्यमपि सत्यपेणोपकल्पितं स्वशक्तया धृतञ्च। तस्मान्नानाऽवस्थासु तदेकस्येवानुव्याप्ति: स्थानमिति सिद्धयति।

**४. पोषणम् -**

'पोषणं तदनुग्रह:' इति तल्लक्षणाद् जीवानामुपरि भगवत्कृपावर्षणमेव पोषणम्।

भगवत्कृपैव जीवस्य मुमुक्षामुद्बोधयति, सैव च तं परमसुखेनोपबध्नाति । यत: सातमखिलसच्चिदानन्दसुधासारेण पुष्णात्यतो भगवत्कृपैव भागवते पोषाभिधानेनोपलक्ष्यते। लक्षणेनानेन भगवदनुग्रहप्रतिपादककथानामवश्यम्भाविता भागवते सिद्धयति येन साधारणा अध्यात्मवर्त्यनिहोत्साहा अपि जना भगवदाभिमुख्यमधिगन्तुं प्रभवेयुरिति।

**५. ऊति:-**

प्रश्नोऽयमुदेति श्यदीदृशी भगवत्कृपा सर्वदैव जीवानामुपरि यदि वतत एव, तत्कथं ते संसारदावानले दग्धीभूता: क्लिश्यन्ते, कथं वा सहसैव निरामयं भगवद्धमा न प्रविशन्तीति ?

तदस्य समाधानमिदं लक्षणं कुरुते 'ऊतय: कर्मवासना' इति वचोभि:। जीवानां स्वकर्मवासना एव 'ऊतय:' याभिर्भगवदंशभूतोऽपि स बलात् पृथक्कृत:। अत एव जीवगतवासनाविपाकस्य तन्निरोधस्य च निरूपणं भागवतस्य यल्लक्षणं, करोति तद् ऊतिरिति शब्देनोच्यते।

**६. मन्वन्तरम् -**

'मन्वन्तराणि सद्धर्म' इति लक्षणात् सर्गस्य यत्कालविशेषे मनुस्तत्पुत्रा: इन्द्र: सप्तर्षयश्च भगवद्भक्तिप्रतिपादकान् धर्मविशेषानाचरन्ति, स्वकीयाचरणेन च तत्कालवर्त्तिजनानां धर्मभावनां शास्त्रदिशा परिशोधयन्ति, तत्कालविशेषस्य र्धविशेषस्य च वर्णमनेव मन्वन्तरम्। एतेनाधिकारिभेदमुपलक्ष्य तत्तन्मवन्तराणां भगवत्प्राप्तिसाधनप्रणाली निर्दिश्यते, येन जना: स्वरुचिमधिकारक्षमतां चाभिलक्ष्य स्ववर्मग्रहणे समर्था: स्यु:।

**७. ईशानुकथा-**

**अवतारानुचरित श्हरेश्चास्यानुवर्तिनाम् ।**
**सतामीशकथा: प्रोक्त नानाऽऽख्यानोपबृंहिता:।।**
**(श्रीमद्० २-१०-५)**

सृष्टिप्रलयचक्रे सततं भ्राम्यमाणानां जीवानां कल्याणाय भगवतो नामरूपपलीलाधामोबृंहिता या अवतारलीलास्तत्पार्षदानामपि च यच्चरितानि भवन्ति, तानि सर्वाण्यपि समुदितधिया लक्षणेऽस्मिन्नन्तर्भवन्तिं भगवच्चरितनिषेवणात्तत्प्रीतिर्भवति, प्रीत्यैवजनार्दनस्तुष्यति, तस्य तोषणमेव जीवस्य परमपुरुषार्थसाधनमिति भागवतस्य सप्तमेऽस्मिंल्लाणे भगच्चरितप्राधान्यमेव विवक्षितमित्यवैम:।

**८. निरोध: -**

**'निरोधोऽस्यानुशयनमात्मन: सह शक्तिभि:।'**
**(श्रीमद्० २-१०-६)**

इत्यस्य लक्षणम्। एतस्य प्रसङ्गतो विविधा अर्था: सम्भवन्ति। प्रत्नामाचार्याणां व्याख्यासरणिमाश्रित्य केचनात्र निर्दिश्यन्ते, तद्यथा-

१. भगवदतिरिक्तं सर्वमपि स्थावरजङ्गमात्मकं जगत् प्रलयात्मकमेव। अतस्तस्य नेमित्तिकादिप्रलयसंस्थानां वर्णनं, परमेश्वरस्य च सत्तारुपेणावशिष्टत्वमेव निरोध:।

अथवा

निरोध: भगवत्कथामाधुरी प्रवर्षणेन जीवगताज्ञानकटुकषायवासनाविपाकनिरसनमेव

२. आत्मनो जाग्रत्स्वप्नसुषुप्त्यादिविरहितं तुरीये परमात्मनि शयनमेव निरोध:।

३. लोकत्रासहेतुकानामसुराणां दुष्टभूभुजां च भगवत्कर्तृकदमनमेव निरोध: । एवञ्च

**९. मुक्ति:-** अज्ञानकल्पितकर्तृत्वभोक्तृत्वादीनात्मभावान् परित्यज्यात्मन: स्वरूपावस्थानमेव मुक्तिलक्षणस्य विषय:-

**'मुक्तिर्हित्वाऽन्यथारूपं स्वरूपेण व्यवस्थिति:।**
**'मुक्तिर्हित्वाऽन्यथारूपं स्वरूपेण व्यवस्थिति: ।'**
**(श्रीमद्० २-१०-६)**

उत्तरार्धेम इत्यत्र निरुपणात्।

**१०. आश्रय: -** भागवतस्येदं दशमं लक्षणं सुतरां महत्वपूर्णम्। अस्य शुद्धर्थस्पष्टीकरणार्थमेव नवानां लक्षणानां प्रवृत्तिर्भवति, यथोक्तमत्रैव- लक्षणस्य 'दशमस्य विशुद्धयर्थं नवानामिह लक्षणम्।' (श्रीमद्० २-१०-२ १/२)

जडजङ्गमात्मकस्य विश्वस्यौपतत्तिकमुपसंहारातमकं चोभयविधस्वरूपं यस्मिन् प्रतीयते स एवाश्ररू: परं ब्रह्म परमात्मेति च शब्यते। अतस्तस्य प्रधानतया प्रतिपादनं लक्षणेन येन क्रियते, तदन्वर्थतया श्आश्रयश इति निगद्यते विपश्ञ्श्चद्भिर्यथा-

आभासश्च निरोधश्च यतश्चाध्यवसीयते।
स आश्रय: परं ब्रह्म परमात्मेति शब्यते ।।

इत्येवमेतानि भागवतस्य दशलक्षणानिव्याख्यातानि ।

# सम्पादकीयम्

सम्मान्या: सुरभारतीसमुपासका:!

सादरं नमोनम:।

उत्तराखंड गंगोत्री यमुनोत्री केदारनाथ: बद्रीनाथ: इत्येषां चतुर्धाम्नां कपाटोद्घाटनम् आवृभ्य तीर्थयात्रिषु उत्साह: लक्ष्यते। एतावता प्रायेण 12 लक्षं श्रद्धालव: दर्शनम् अकुर्वन्। श्रद्धालूनां संख्याधिक्येन संसाधनानाम् अभाव: प्रशासनिक-अव्यवस्था अपि उपेक्षयितुं शक्यते। एषा स्थिति: अधिकांशेन एकां महतीम् आपत् जनयति। तीर्थ स्थलेषु तीर्थटनयात्रास्थाने पर्यटनयात्रायां परिवर्तिता तस्मात् जनसमर्दवध ॅ नौ वर्धितम्। पर्वतेषु शांत वातावरणं नश्यति अथ च धार्मिक -आस्थाया: अपि क्षति: जायमाना वर्तते।

ग्रीष्मर्तौ यदा विद्यालयानां, न्यायालयानां अन्येषां विभागानाम् अवकाश: भवति तदा जना: पर्यटनाय पर्वतक्षेत्रं प्रति यान्ति। परंतु पहाड़ी क्षेत्रेषु संसाधनानां व्यवस्थायाश्च अभावे प्रकृतिं प्रति अतिक्रमण स्थिति: उत्पन्ना। येन प्राकृतिक-आपद् आशंकते। गत वर्षेषु आगता प्राकृतिक आपद: अस्य प्रत्यक्षम् उदाहरणम्। प्रशासनेन तीर्थाटनस्य पर्यटनस्य यात्रिण: पृथक-पृथक् मात्वा , पंजीकृत्य यात्रा सुनिश्चेया। सहैव प्रतिदिनं तीर्थ यात्रिणां संख्यापि निधरिणीया:। जनसमर्दे संख्या प्रतिबद्धा स्यात्। प्राय: एवं दृष्टमस्ति यत् केचन एकस्मिन् पर्याये बारं-बारं यात्रां कुर्वन्ति। आगामि यात्रिणाम् अधिकार: हन्यते। यद्यपि प्रायेण कपाटोद्घाटनोत्तरमेव जनसमर्द:, अनियंत्रित: जायते तथापि धाम तु सितंबर अक्टूबर मासीय सुरम्य वातावरणं यावत् उद्घटितं भवति। पर्वतक्षेत्रे तीर्थ यात्रिणाम् असीमित संख्यया प्रदूषणेन सह वाहनानां ध्वनि प्रदूषणैन तत्रत्यं शांत वातावरणमपि प्रभावितं भवतिस मानवस्य असंतुलित व्यवहारेण बहुधा प्रकृतिरपि स्वीय रौद्र रूपं धृत्वा आपद्कारण निर्मातिस अत: एकत्र प्रशासनेन चतुर्धाम यात्रायै व्यवस्था उत्तमा करणीया अपरत्र हश श्रद्धालु पर्यटकैरपि आचारेण विचारेण च स संयमेन संतुलितैरपि अवश्यं भवितव्यम्।

भवदीया

सम्पादिका

## मतदानं महीयताम्

दह्यते मित्र! देशोऽयं प्रचण्डैरातपैरहो!
नैवातपैरहं मन्ये मित्र! निर्वाचनाग्निना।। १
लोकतन्त्रमहायज्ञादुत्थिता वह्नयोऽद्भुता:।
पावयन्ति शरीरं नो ज्वालयन्ति न संशय:।।२
अनियन्त्रित- जिह्वानां नेतृणां वचनानल:।
प्रजानां कुरुते चित्तं नित्यं दग्धं मुहुर्मुहु:।। ३
वराकी चिन्तिता दूना प्रजा ग्रीष्मे निपीडिता।
नेतारं चेतुमायाता मध्येमार्गं विषीदति।। ४
मतदानं प्रदातव्यं भारतोत्कर्षहेतवे।
सर्वै: समुत्थितै: काले निर्भयं सह बान्धवै:।। ५

-अरविन्द तिवारी

बागपतम्

## ॥ वेद वाणी ॥

'यस्य ते पूषन्सख्ये विपन्यव: क्रत्वा
चित्सन्तोऽवसा बुभुज्रिर इति क्रत्वा बुभुज्रिरे ।
तामनु त्वा नवीयसीं नियुतं राय ईमहे ।
अहेळमान उरुशंस सरी भव वाजेवाजे सरी भव ।।'

'O! Lord Pushan, the Nourisher,"the wise,with Your protection and in friendship with You, gain joy and all ends of life. Be being in accord with the most laudable wisdom of Yours, we seek infinite wealth and riches. May the Supreme Lord, praised by all, come to our defence in every battle with our enemies.'

The Rig Veda 1.138.3

**संकलन : एस.वासुदेव राव:**

# वेदान्तपञ्चदशी पञ्चमप्रकरणम्

# ( महावाक्यानुशीलनम् )



रामप्रिय शर्मा

पञ्चदश्यां पञ्चमप्रकरणान्तर्गते ऽष्टसुश्लोकेषु

तत्त्वमस्यादिमहावाक्यानि समासतो व्याख्यातानि अनुष्टुप् छन्द:प्रयोगेण, प्रतिमहावाक्यं श्लोकद्वयं निर्माय सर्ववेदान्तसारभूतलक्षणानि महावाक्यानि सवैशद्यं सम्यगुपपादितानि अत्र घटे समुद्रपूरणमितिलोकोक्तिं चरितार्थीकुर्वता भगवता श्रीमद्विद्यारण्यसरस्वतिना स्वकीया नवनवोन्मेषशालिनी प्रतिभा प्रदर्शिता।

अत्र किं महावाक्यं (कानि महावाक्यानि)? इति जिज्ञासायां सत्यां निवेद्यते। महच्च वाक्यञ्च महावाक्यमित्यत्र कर्मधारयतत्पुरुषसमास:। ब्रह्मात्मैक्यप्रतिपादनपराण्यभेदश्रुतिवाक्यानि महावाक्यत्वेन व्यपदिष्टानि भवन्ति। महावाक्याभिधानमत्र भेदोपाधिव्यावर्तकं सत् जीवब्रह्मणोरैक्यं द्रढयति नन्वभेदश्रुतीनां महावाक्यत्वेन व्यपदेशो न सङ्गच्छते सर्वेषां श्रुतिवाक्यानां प्रामाणिकत्वात् मुख्यत्वाच्चात: श्रुत्या सह भेदभावप्रवर्तनं न न्याय्यम्।

मैवम्, अभेदश्रुतीनां भेदश्रुत्यपेक्षया बलीयस्त्वात् अतो भेदबुद्धिर्न प्रसज्यते ऽत्र वस्तुतो भेदबुद्धिराध्यासिकी अभेदबुद्धि: पारमार्थिकी च। तत्त्वज्ञानसाक्षात्कारदशायामद्वैतज्ञानमेव प्रतिफलितं भवतीति न संशीतिलेश:।

चत्वारि महावाक्यानि

'तत्त्वमसि'',अहं ब्रह्मास्मि,', 'अयमात्मा ब्रह्म', 'प्रज्ञानं ब्रह्म,' इति चत्वारि महावाक्यानि।

तत्त्वमसीति महावाक्यं सामवेदस्य तलवकारशाखान्तर्गते छान्दोग्यब्राह्मणेन सम्बद्धाया: छान्दोग्योपनिषद:षष्ठाध्याये सद्विद्याप्रकरणे पितापुत्रसंवादमाध्यमेन सुष्ठु निरूपितं भवति।

अहं ब्रह्मास्मीति महावाक्यं शुक्लयजुर्वेदेन सम्बद्धाया: बृहदारण्यकोपनिषद: प्रथमाध्यायस्य चतुर्थब्राह्मणे सम्यग् विवेचितमस्ति। अथर्ववेदीयायां माण्डूक्योपनिषदि ओङ्कारवाच्यस्य ब्रह्मणस्सर्वात्मकत्वनिरूपणप्रसङ्गे 'अयमात्मा ब्रह्म' इति महावाक्यस्य डिण्डिमघोष: संश्रूयते।

'प्रज्ञानं ब्रह्म 'इति महावाक्यं ऋग्वेदेन सम्बद्धाया ऐतरेयोपनिषद: तृतीयाध्यायस्य प्रथमखण्डे सम्यगाम्नातं भवति।खण्डोऽयमात्मसम्बन्धि प्रश्नेन प्रारभ्यते।गमनागमनसंसृतिचक्रान्निवर्तितुकामानां ब्रह्मवादिनां परिषदि मिथ: 'कोऽयमात्मा यस्योपासका वयम्? यस्योपासनरतेनर्षिणा वामदेवेनामरत्वमवापि' 'इत्यात्मजिज्ञासापरकप्रश्न:समुत्थितो भवति।

श्रुतिवाक्येषु यत्रैकत: 'एकमेवाद्वितीयम्' ,'आत्मा वा इदमेक एवाग्र आसीत्''इत्यादिना भेदत्रयविनिर्मुक्तं निरुपाधिकं चौतन्यं (आत्मतत्त्वं वर्ण्यते तत्रैवापरत: 'स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत'7

इत्यत्र सोपाधिक इवात्मा निरूप्यते।

एतयोरेक एवात्मा उपास्यो भवितुमर्हति,न त्वात्मद्वयम्। अतो ब्रह्मविद्यापरिषद्यात्मस्वरूपं प्रति 'कतर स आत्मा? इति परस्परं पृच्छन्ति स्म।

पदार्थशोधनम्

महावाक्यानां पदार्थशोधनाय प्रतिपदमर्थस्वरूपोद्घाटनमावश्यकं यत:पदार्थशोधनं विना सम्यक् तत्त्वबोधो न जायते।प्रतिपदमर्थं गुरोर्मुखारविन्दाच्छ्रवणं ततस्तन्मननादिसाधनाभ्यसनं पदार्थशोधनम्।प्रतिपदमर्थस्वरूपस्य सम्यङ्निरूपणाय सर्वप्रथमं ऋग्वेदेन सम्बद्धं 'प्रज्ञानं ब्रह्म 'इति महावाक्यव्याख्यानमुपक्रमते निम्नोक्तेन श्लोकेन स्वामिवर्यश्रीविद्यारण्यसरस्वतीमहाभाग:

'येनेक्षते शृणोतीदं जिघ्रति व्याकरोति च।
स्वाद्वस्वादू विजानाति तत्प्रज्ञानमुदीरितम्।।'

अत्र प्रज्ञानशब्दश्चौतन्यवाचक: प्रकृष्टज्ञानरूपत्वात् 'येन'शब्द: प्रत्येकमभिसम्बध्यते यथा येन ईक्षते येन शृणोति येन विजानातीति।

अन्वय: येन ईक्षते इदं शृणोति जिघ्रति व्याकरोति च स्वादु अस्वादु विजानाति तत् प्रज्ञानमुदीरितम्।

येन चौतन्येन (चक्षुर्द्वारा निर्गतान्त:करणवृत्त्युपहितेन) ईक्षते पश्यति कश्चिन्मनुष्यो नदीवाटिकासमुद्राकाशप्रस्तरनिर्झरमेघादीनि सर्वाणि दृश्यजातानि।येन चौतन्येन (श्रोत्रद्वारा निर्गतान्त:करणवृत्त्युपहितेन)इदं सर्वं शब्दजातं शृणोति,येन चौतन्येन (घ्राणद्वारा निर्गतान्त:करणवृत्तिसंयुक्तेन) गन्धजातं जिघ्रति येन चौतन्येन (वागिन्द्रियनिर्गतान्त:करणवृत्त्युपाधिकेन))व्याकरोति विविधान् शब्दान् उच्चारयति संभाषणादिकं व्यवहारं विदधाति च।येन रसनेन्द्रियनिर्गतान्त:करणवृत्त्युपहितेन चौतन्येन स्वादु अस्वादु च विजानाति (स्वदते), तच्चौतन्यं प्रज्ञानशब्देनोदीरितं भवति ।

प्रज्ञानशब्दतात्पर्यनिर्धारणोत्तरं ब्रह्मशब्दार्थं निरूपयति-

चतुर्मुखेन्द्रदेवेषु मनुष्याश्वगवादिषु।
चौतन्यमेकं ब्रह्मात: प्रज्ञानं ब्रह्म मय्यपि।।
(पञ्चदशी,महावाक्यप्रकरणम्, 2)

अन्वय:

चतुर्मुखेन्द्रदेवेषु मनुष्याश्वगवादिषु एकं चौतन्यं ब्रह्म अत: प्रज्ञानं ब्रह्म मयि अपि (अस्ति)।

चतुर्मुखेन्द्रदेवेषु

चतुर्मुखश्च इन्द्रश्च देवाश्च चतुर्मुखेन्द्रदेवा: तेषु चतुर्मुखेन्द्रदेवेष्विति इतरेतरयोगद्वन्द्वसमास:।

चतुर्मुखो ब्रह्मा हिरण्यगर्भापरसंज्ञ: (हिरण्याण्डजात:)प्रथमजश्शरीरी सृष्टिकर्तृत्वेन

प्रसिद्धो देव:। इन्द्रो देवराज:(देवराजपदमावेशित:) अन्यान्यदेवाश्चोत्तमजन्मानस्सर्वे।

मनुष्याश्वगवादिषु

मनुष्यश्च अश्वश्च गौश्च आदिश्च मनुष्याश्वगवादिषु इतरेतरयोगद्वन्द्वसमास:।

एतेषु मध्ममजन्मानो मनुष्या: अधमजन्मानश्चाश्वगवादिषु।अत्र आदिशब्देन पक्ष्यादीनि अण्डजानि मनुष्यादीनि जरायुजानि यूकादीनि स्वेदजानि वृक्षादीनि उद्भिज्जानि चोपादीयन्ते।

अहं ब्रह्मास्मि (बृह०उ०१/४/१०)

'प्रज्ञानं ब्रह्म '(ऐत०उ०३/१)इति महावाक्यार्थस्य सम्यगुपपादनोत्तरम् 'अहं ब्रह्मास्मि 'इति बृहदारण्यकोपनिषत्प्रोक्तमहावाक्यस्यार्थो विचार्यत उत्तरश्लोकद्वयेन।अत्र संसारमहोदधिं सद्गुरूपदिष्टतत्त्वज्ञाननावा तितीर्षवो नित्यनिरतिशयश्रेयो विज्ञातुकामा ब्रह्मवादिनो महर्षिप्रवरा:परब्रह्मस्वभावं प्रति परस्परं विचारयन्ति। सन्दर्भेऽस्मिन्नस्या उपनिषद: प्रथमाध्याये चतुर्थब्राह्मणस्य निम्नोद्धृतो मन्त्रस्समीक्षितव्य:

**'यद्ब्रह्मविद्यया सर्वं भविष्यन्तो मनुष्या मन्यन्ते।**
**किमु तद्ब्रह्मावेद्यस्मात्तत्सर्वमभवदिति ।।तत्रैव १/४/९।।**

मन्त्रेऽस्मिन्सर्वभावापत्तिहेतुत्वादात्मविद्याया महनीयवैशिष्ट्यमत्र ध्वन्यते'ब्रह्मविद्यया भविष्यन्तो मनुष्या: मन्यन्ते 'इत्यत्र मनुष्यपदप्रयोगेण ब्रह्मविद्यायाम् अभ्युदयनि:श्रेयससाधने विशेषतो मनुष्याधिकारत्वं संसूच्यते।

अत्र ब्रह्मविद्याफलभूता सर्वभावावाप्ति:। कर्मफलप्राप्तिवद् ब्रह्मविद्यया सर्वभावप्राप्तिर्निश्चितेत्यवगम्यते।ब्रह्मविद्यया चरमनि:श्रेयसाधिगमो भवतीति वचनं संलक्ष्य 'तद्ब्रह्म किमवेद्यस्मात् (ज्ञानात्)तत्सर्वमभवत्?'इति पृच्छायां सत्यामुत्तरयति भगवती श्रुति: 'ब्रह्म वा इदमग्र आसीत्तदात्मानमेवावेत।अहं ब्रह्मास्मीति।तस्मात् तत्सर्वमभवत् यो यो देवानां प्रत्यबुध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणां तद्धैतत्पश्यन्नृषिर्वामदेव: प्रतिपेदेऽहं मनुरभवं सूर्यश्चेति ।'[ तत्रैव,१/४/१०/]।

इदम्पदेनात्र जगदभिधीयते यदग्रे (सृष्ट्यादौ) ब्रह्मैवासीत् तत्र ब्रह्मव्यतिरिक्तं नान्यत्किञ्चदवर्तत तदाऽत्मानं 'अहं ब्रह्मास्मि' इत्यजानात्।

इत्थं देवमनुष्यर्षीणां य: कश्चिदप्यात्मानं ब्रह्मत्वेनावेत् स एव सर्वरूपोऽभवत्, तत्त्वदर्शिना वामदेवर्षिणा' अहं मनुरभवं सूर्यश्चेत्युद्घोषितम्। अत्र मन्वादिपदद्वयमुपलक्षत्वेनाभ्युपगन्तव्यं तत्सर्वभवनात्।

लोकेऽस्मत्प्रत्ययगोचरत्वं प्रतिदिनं संलक्ष्यते। अविद्यया ऽऽत्मनि

'कर्ताऽहम्', 'सुख्यहम्', 'दुर्बलोऽहम्', 'शक्तिसम्पन्नोऽहम्',' मदीयोऽयं पुत्र: ' ,

'मूर्खोऽहम्', इति बहुविधान् देहादिधर्मानारोप्य सुखदु: खादिकमनुभूय जन्ममरणादिसंसृतिचक्रं पौन:पुन्येनापद्यते।ईदृश्यां दशायां परमकारुणिकेन तत्त्वदर्शिनाऽऽचार्येण'नासि त्वं देहधर्मावच्छिन्नो दुर्बलो विवशो मनुष्य: प्रत्युत सत्स्वरूपं ब्रह्म एव' इत्युपदिष्टे सत्यनुष्ठितश्रवणमननादिसाधनोऽसौ लब्धस्वरूप: सर्वरूपश्च भवतीति न संशीतिलेश:।

अत्र स्वामिवर्यश्रीविद्यारण्यसरस्वतिना निम्नोद्धृतेन श्लोकेन अहंपदस्य लक्ष्यार्थविवेचनं क्रियते-

'परिपूर्ण: परात्मा ऽस्मिन् देहे विद्याधिकारिणि
बुद्धे: साक्षितया स्थित्वा स्फुरन्नहमितीर्यते।'(पञ्चदशी , ५/४)

अन्वय: परिपूर्ण: परात्मा अस्मिन् विद्याधिकारिणि देहे बुद्धे: साक्षितया स्थित्वा स्फुरन् अहम् इति ईर्यते।

(१) परिपूर्ण:परात्मा- परित: पूर्ण: सर्वात्मना पूर्ण: परिपूर्ण: क: परिपूर्ण:? परात्मा परमात्मा परिपूर्ण:। कथमयं परमात्मा परिपूर्ण:?

असौ परिपूर्णो देशकालवस्त्वपरिच्छिन्नत्वात् परमात्मा कदापि देशत: कालतो वस्तुतश्च परिच्छिन्नत्वं न याति नित्यनिश्चलनिर्विकारस्वरूपत्वात्।

टिप्पणी - देशकालवस्तुलक्षणोपाधिनाऽऽत्मशक्तिपरिसीमना-

शेषभाग:सप्तमपुटे

# भारतीयवाङ्मये संवादविधिः

## (Dialogue Methods in Bhartiya Vangmay)

-डा. सुरेन्द्र महतो
Dr. Surendra Mahto
School of Education,
SLBSNS University, New Delhi
mahto@slbsrsv.ac.in

संवादः व्यक्तेः दिनचर्याःप्रमुखं साधनं वर्तते । सः संवादः भाषया सम्पाद्यते । साहित्यस्य सर्जनं संरक्षणं च भाषया एव भवति। समाजस्य संस्कृतेश्च संरक्षणं साहित्येन भवति । समाजस्य तात्कालिकस्य ज्ञानविज्ञानस्य संरक्षणं साहित्येन भवति। साहित्यस्य अर्थः आङ्गलभाषायां (Literature) लिट्रेचर इति भवति । किञ्च भारतीयपरिप्रेक्ष्ये अस्यार्थः एकदेशपरिमितो भवति । भारतीयवाङ्मयमतिप्राचीनंविस्तृतं च वर्तते । साहित्यशास्त्रंतु अस्या एका विधा एव। राजशेखरकृत काव्यमीमांसानामके ग्रन्थे-

**अङ्गानिवेदाश्चत्वारो मीमांसान्यायविस्तरः ।**
**धर्मशास्त्रं पुराणानि विद्याश्चौताश्चतुर्दश ॥**

अतः वाङ्मये वेदाः वेदाङ्गानि, पुराणानि, दर्शनानि धर्मशास्त्रादयः, समागच्छन्ति। वेदारभ्य अधुनातनरचनापर्यन्तं सर्वाषां रचनानामाधारः सम्वाद एव । ऋग्वेदे विश्वामित्रनदी, पुरुर्वा-ऊर्वसी, यम-यमी आदयः, उपनिषत्सु अपि संवादः रामायणे, महाभारते पुराणेषु अन्येषु ग्रन्थेष्वपि संवादस्य प्राधान्यं वर्तते । नाट्यशास्त्रे दशरूपकादिषु ग्रन्थेषुः नाटकं रूपकं वा संवादात्मकं भवति इति निर्देशः वर्तते । संवादमाध्यमेन विषयतथ्यान् समाजिकेषु सरलतयासुगमरीत्या सद्यः एव अवगमयितुं बोधयितुं वा क्षमः । अतः सम्वादस्य महत्त्वम् अनुभूय न भारतीयमनीषीषु अपितु पाश्चात्य शिक्षाविद्षु अपि शिक्षणाधिगमस्य आधारस्वरूपं संवादं (Dialogue's) शिक्षणविधिरूपेण अङ्गीकृतम्। नूतनशिक्षानीत्यामपि भारतीयज्ञानविषये बलं प्रदत्तम्। अनेन भारतीयशिक्षणाधिगमपद्धतौ संवादविधेः प्रमुखं स्थानम् अस्ति। पत्रेऽस्मिन् विस्तृतरूपेण उदाहरणपूर्वकं

पारिभाषिकशब्दाः -वाङ्मयम्, संवादः, शिक्षणविधिः, वेदाङ्गानि, शास्त्रम्, विद्यास्थानम्

**अङ्गानि चतुरो वेदा मीमांसा न्यायविस्तरः ।**
**पुराणं धर्मशास्त्रञ्च विद्याह्येताश्चतुर्दश ।।3/6/28।।**

**आयुर्वेदो धनुर्वेदो गान्धर्वश्चैव ते त्रयः ।**
**अर्थशास्त्रं चतुर्थन्तु विद्याह्यष्टादशैव ताः।।3/6/29।।वि .पु.**

इत्युक्ते विष्णुपुराणे उल्लिखिते पद्ये भारतीयवाङ्ग्मयस्य विवरणं प्राप्यते । विषयेऽस्मिन् राजशेखरःव्यनक्ति -

" वाङ्मयमुभयथा शास्त्रं काव्यं च । पुनः शास्त्रं द्विधा-अपौरुषेयं पौरुषेयं चेति। अपौरुषेयं श्रुतिः । श्रुतिः पुनः द्विधा मन्त्राः ब्राह्मणं च ।विवृत्तक्रियातन्त्रा मन्त्राः । मन्त्राणां स्तुतिनिन्दाव्याख्याविनियोगग्रन्थो ब्राह्मणम् । ऋग्यजुः सामवेदास्त्रयी आथर्वणश्चतुरीयः । अर्थात्-ऋग्यजुः साम-अथर्व चत्वारोवेदाः : चत्वारो उपवेदाः । शिक्षा, कल्पो व्याकरणं, निरुक्तं, छन्दः ज्योतिषञ्च षड् वेदाङ्गानि, पुराणम्, आन्विक्षिकी, मीमांसा, स्मृतितन्त्रमादयाः अष्टादशविद्या। पुनः काव्यम् तत्र दृश्यंश्रव्यञ्च। दृश्ये - नाटकम्, प्रकरणम्, भाणः, व्यायोगः समवकारः डिमः ईहामृगः, अङ्कः, विधिः प्रहसनम् । श्रव्ये - रामायणम् शिशुपालवधादयः । एतानि सम्मिल्य वाङ्मयुत्वेन ज्ञायन्ते।' वाङ्मये शास्त्राणि काव्यानि वा स्युः। सर्वं सम्वादमाश्रितः । सर्वत्र सम्वादमाध्यमेन कथ्यं प्रस्तुतं वर्तते। येन कथनस्य विषयवस्तोश्चोपस्थापनं स्पष्टीकरणं च समाजिकानां कृते सरलं सहजं ग्राहयं च वर्तते । सम्वादमाध्यमेन प्रेषकः अभिग्राहकश्च सारल्यमनुभूयते।इत्युक्ते शिक्षणाधिगमप्रक्रियायां सम्वादः प्रमुखविधि रुपेणशिक्षाशास्त्रिणा अङ्गीकृतः।

जिज्ञासा मानवस्य प्रकृतिः अस्ति। जनाः स्वप्रकृत्या प्रकृतिमवगन्तुम् उद्यतः। अनेन क्रमेण शिक्षणाधिमस्य विविधानामुपकारणानां विधीनां च अन्वेषणमाभिज्ञानञ्च जातम्।शिक्षणाधिगमप्रक्रियायां द्वयोः: जनयोः मध्ये परस्परम् अनुभवस्यआदानप्रदानं भवति। अनुभवस्य आदानप्रदानं सरलरीत्या कथं भवेदीति अनुश्रित्य शिक्षणविधीनामङ्गीकारः भवति। शिक्षणाधिगमस्य विधिषु सम्वादविधिः स्थानं प्रमुखं भजति ।

संवादः मुख्यतः व्यक्तयोः द्वयोः व्यक्तिसमूहयोः समूहसमूहयोः मध्ये वा समस्या समाधानाय, उद्गाराभिव्यक्तये आत्मविकासाय सौहार्दस्थापनाय रहस्योद्घाटनाय वा भवति । संवादे कथोपकथनं परिप्रश्नं प्रश्नोत्तरमपि भवति। सम्वादः एषः शिक्षकविद्यार्थिनो शिक्षकयोः विद्यार्थिनोः मध्ये वा भवति। प्राचीनभारतीयशिक्षापद्धतौ संवादः ज्ञानार्जनाय ज्ञानप्रदानाय च भवति स्म। अधीतज्ञानपरीक्षणाय अपि यदा अस्य प्रयोगः भवति स्म तदा शास्त्रार्थनाम्ना ज्ञायते । संवादः यदा कक्ष्यायां भवति तर्हि विद्यार्थिनः आत्मविश्वासो वर्धते, अभिव्यक्तिक्षमतायां वृद्धिः भवति, नूतन-ज्ञानस्य सर्जनं भवति, शिक्षणाधिगमे रुचिः जागर्ति विषयावबोधोऽपि सद्यः भवति ।

संवादः शिक्षणाधिगमप्रक्रियायाः महत्त्वपूर्णो घटकः भवति। अस्य संवादात्मिकासमावेशीप्रकृतिः समीक्षण प्रवृतिं प्रोन्नयति । छात्राणाम् अभिव्यक्तये तथ्यान् अधिगन्तुं च वर्धयति । मुक्त संचारसहयोगाभ्याम्मञ्चं प्रदाय समग्राधिगन्तुं समृद्धि प्रयच्छति। सकारात्मकमाकषर्कम् अधिगमाय परिस्थितिनिर्माणञ्चकरोति। यत्र-परस्परान्तक्रिया, समूहपरियोजनासहयोगात्मकं शिक्षणं, ऑनलाईन इति आभासीमञ्च अभिभावकशिक्षकसम्मेलनं सहाय्यं च प्रयच्छति । सहैव - अन्तःक्रिया अधिगमं (Interactive learning) परस्परसम्मानं (Mutual Respect), रचनात्मकप्रक्रिया (Constructive Feedback), आलोचनात्मक चिन्तनं (Critical Thinking), सहानुभूति (Empathy) च विकासयति।

सम्यक्द सम्वादाय ध्यातव्यबिन्दवः चत्वारः सन्ति पुनः तेषाम् उपबिन्दव्योऽपिसन्ति। यथा-

**संरक्षणं समालोचनं चौव ।**
**सह्योगात्मकम्सर्जनं तथा।।**

इत्युक्ते स-चतुष्टयं संकेतितं भवति ।




संरक्षणम् (Caring) इत्यत्र-
-अवधानपूर्वकं सहानुभूतिपूर्वकं च परस्परं श्रोतव्यम् ।
- प्रत्येकस्य कृते वाचनाय (अभिव्यक्तये) समयो देयः ।
-विषयः अवधेयः।

समालोचनात्मकम् (Critical) इत्यत्र -
- ऊहः आहवानं स्वविचारश्च
- सम्यक् साक्ष्यम् उदाहरणं प्रदानं च।
- तर्कपूर्णरूपेण निष्कर्षं प्रतिगमनम्।

सहयोगात्मकम् (Collaborative) इत्यत्र -
- स्वविचाराणाम् उपस्थापनं स्पष्टीकरणञ्च।
-स्वविचारान् प्रति प्रत्येकंविचाराभिक्तये अवसरो देयः।
- प्रत्येकेषु मतेषु विचारप्रदानम्।

सर्जनात्मकम् (Creative) इत्यत्र -
- अन्येषु विन्दुषु परिचर्चा।
-विचारान् अनुभवेन सह संयोजनम्।
- उदाहरणतुलनयोःप्राप्तिः।

उक्तप्रक्रियया कक्षा-कक्षे शिक्षणाधिगमे च सम्वादस्य प्रकरणेषु संचालनं भवति। येन विद्यार्थिषु अधिगमः स्वल्पसमये, सम्यकतया दृढ़ः भवति। एतेषां सर्वेषामाधारः व्यक्तीनां परस्परव्यवहारः। ततः भारतीयवाङ्मयेसंवादस्यदृढाधारः वर्तते। क्रमेण विवरणंसंक्षिप्तं दीयतेऽत्र ।

**वेदे सम्वादः -** वेदेषु प्राचीनतमवेदः ऋग्वेदः । यत्र प्रायशः बहवः सम्वादाः सन्ति । यथा- इन्द्रमरुत् , इन्द्र-अगस्त, अगस्त-लोपामुद्रा, विश्वामित्र-नदी, इन्द्र-अदिति-वामदेव, इन्द्र-वरुण, भार्गव-इन्द्र, यम-यमी, इन्द्र-इन्द्राणि, पुरुर्वा- ऊर्वसी, सरमा-पणि, इन्द्र- अग्नि आदयः संवादाः प्राप्यन्ते । उपनिषत्सुसंवादः-कठोपनिषदि नचिकेता-यमः प्रसिद्ध संवादे आत्मनः गुढ़रहस्यं विवेचयति। बृहदारण्यकोपनिषदि-याज्ञवल्क्य-मैत्रेयी संवादः, मुण्डकोपनिषदि-अङ्गिरस-शौनक संवादः, केनोपनिषदि-गुरुशिष्य सम्वादः प्रश्नोपनिषदि ऋषिपिप्पलाद-सुकेशादयः सम्वादः, तैतिरीयोपनिषद्दि बहवः संवादः प्राप्यन्ते । अनेन वेदेषु उपनिषत्सुऋषिणां मुनीनां देवीनां देवतानां मध्ये ज्ञान-विज्ञाने आत्म-परमात्मइत्यादिषुविविधेषुविषयेषु संवादः वर्तते।

महाकाव्येषु-रामायण-महाभारतयो बहवः सम्वादः प्राप्यन्ते। इत्युक्ते रामायणे प्रसिद्धः सम्वादः कैकयी-मन्थरा, राम-सीता, राम-निषाद, राम-भरत, हनुमान-सीता, रावण-अंगद, राम-लक्ष्मण' आदयः । तथैव रामायणाधृत्कुकाव्येष्वपि संवादस्य प्रामुख्यता वर्तते । महाभारतमपि संवादप्रधानम् अस्ति । यथा-द्रौपदी-धृत्यराष्ट्, कृष्ण -अर्जुन, युधिष्ठिर-यक्ष, कर्ण-कृष्णादयाः विविधाः संवादाःसन्ति । ततः परिवर्तिकाव्येष्वपि संवादस्य प्राधान्यम् अस्ति। पुनः नाटकं तु संवादनाम्ना एव प्रसिद्धं तत्र तु विषयस्य अग्रसारणं सम्वादमाध्यमेन एव भवति।

अद्यतनीया रचनासु यथा कथा-आख्यायिका, उपन्यासादयेष्वपि संवादस्य आश्रयः विषयवस्तुनः स्थापनाय सम्पादनाय च भवति। चलचित्रमपि सम्वादप्रधानं भवति। एतर्थ बालानां कृते रचितसाहित्येषु यथा- विष्णुशर्मणः पञ्चतंत्रम नारायणपण्डितस्य हितोपदेशः अपि पशुपक्षिणां मध्ये सम्वादानां संकलनम् अस्ति।

येन शिशवः किशोराश्च रुचिपूर्वकं विषयान् अवबोधुं समर्थः भवेयुः। तदाधारेण सम्प्रति विविध- विषयमवलम्ब्य (कॉमिक्स) हास्यकथा, (कार्टून) चलचित्रस्य निर्माणं भवति। अत्र विशिष्य संस्कृतसाहित्यस्य चर्चा अभवत् । परन्तु अन्याषुभाषासुरचितसाहित्येषु संवादस्य प्राधान्यंदृश्यते ।

अतः निष्कर्षरूपेणवक्तुं शक्यते यत विस्तृत- प्राचीनेच संस्कृतवाङ्मये (भारतीयवाङ्मये) संवादस्य प्रमुखं स्थानं वर्तते।प्राचीनभारतीय शिक्षापद्धतिःमौखिकी आसीत् । सा पद्धतिः गुरुकुलीयपद्धतिः श्रुति (श्रौत) पद्धति नाम्नाऽपि ख्याता। तत्र प्रायःलौकिकपारलौकिकज्ञानप्रदानग्रहणस्यआधारःसम्वादः इत्युक्तेपरस्परवार्ता, कथोपकथनं, शंकासमाधानम् भवति स्म। विधिरस्य अवलम्बनं वर्तमान समयेऽपि कस्यां नूतनज्ञान सर्जनाय विद्यार्थिषु आत्मविश्वाससम्वर्धनाय, परस्पर विचार-विमर्श सम्पादनाय, स्वविचार प्रसारणाय प्रमाणीकरणाय नूतनप्रकरणेषु स्वमतं तर्कपूर्णरूपेण उपस्थापनाय, सहपाठिनं धैर्यपूर्वकं श्रवणाय तेषां विचाराणां समालोचनपूर्वकं निष्कर्षानयनाय स्वविकासाय-समूहविकासाय च भवति। संवादः साहित्यस्य एका विधारूपेणापि स्वीक्रियते । परन्तु शिक्षणाधिगम प्रक्रियायां संवादः शिक्षणाधिगमस्य विधिषु प्रमुखविधिरूपेण स्वीकृत्य मया लिखितः । अस्य आधारः राष्ट्रीयाशिक्षानीति 2020 इति अपि मन्यते।

**सन्दर्भः**

1. राष्ट्रीयाशिक्षानीति 2020।
2. संस्कृत साहित्य परिचय NCERT New Delhi
3. ईशादिनौउपनिषद् ,गीता प्रेस गोरखपुर
4. श्रीमद्भगवद्गीता- गीता प्रेस गोरखपुर
5.वाल्मिकी रामायण, गीता प्रेस गोरखपुर
6. हिन्दी शिक्षण- रमनबिहारी लाल, रस्तोगी प्रकाशनमेरठ
7. slideshare - FARHAIRIA KHALIG. (CU kolhwie)
8.www.OR.annitaa journal.com. IJSR-2020
9. शैक्षिकतकनीकी एवं प्रबन्धन के मूल्य आधार - इन्टर नेशनल १०४. मेरठ
10. उच्चतर शिक्षा मनोविज्ञान-मोतीलाल बनारसीदास,

**पाठकानां कृते सूचना**

**कृपया 'संस्कृत-संवादः' पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुम् आजीवन सदस्यताशुल्कः- रु. २५००/-, पञ्चवार्षिकशुल्कः रु. ११००/- (संस्थादीनां कृते) द्विवार्षिकशुल्कः रु.४८०/- (व्यक्तीनां कृते) मनिऑर्डरः , चैकः, ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां (A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्**

**Sanskrit samvad,**

**Current A/C No. 224902000000142,**
**Indian Overseas Bank, Yamuna Vihar,**
**Delhi-110053**
**IFC Code- IOBA0002249**

## बुद्धो भव



जन्मदाता पिता।
जन्माहित्यकर्ता सद्गुरुः।

-प्रो० चौडूरि उपेन्द्र रावः
संस्कृतप्राच्यविद्याध्ययनसंस्थानम्
जवाहरलालनेहरुविश्वविद्यालयः
नवदिल्ली ११००६७

इतः तत्र गन्तुं चिन्ता साधना।
ततः अत्र कथमागताः
इति चिन्तनंज्ञानम्।
सज्जता हि सिद्धिः
शरीरेण सह भव
यतः तस्मात्त्वं भिन्नः।

माया एकत्र स्थातुं न जानाति
परब्रह्मा चलनं न जानाति।
एतयोः सहयोगेन जायते स जीवः।
अत एव बन्धमोक्षयोः मध्ये जीवः दोलायमानः।

शिष्येणोक्तं, त्वं महान् पुरुषः असि।
गुरुरवदत्- मम अपेक्षया पुरुषः महानिति
त्वं ज्ञातुं समर्थो जातः।

परिवर्तनात्मको हि तमोगुणः
निर्विकारहृदये सत्त्वगुणः।
एतयोर्मध्ये दोलमानं मनः राजोगुणः।
यदि एते त्रिगुणाः,
तर्हि कीदृशः 'जीवः'?

मोक्षस्यावस्थां ज्ञात्वाबुद्धो भव
यदि न जानासि तर्हि भवतु
कोलाहलं न करोतु
चिन्ता नास्ति।

## ।।नवभारताष्टकम्।। ।।गीतम्।।



-ईशान तिवारी
व्याकरण विभाग
काशी हिन्दू विश्वविद्यालय

संस्कार-संस्कृत-वर्धकं
संसाधनैः संवर्धितं
साधुप्रियं सुविधाप्रदं
नवभारतं मम भारतम् ।।1।।

नदि-वृक्ष-पर्वत-पोषकं
भ्रमणार्थमद्भुतरोचकं
पर्यावरण-संसेवकं
नवभारतं मम भारतम् ।।2।।

दीपैः सदैव प्रकाशितं
धूपैः सदैव सुगन्धितं
पुष्पैः समर्चित-पावनं
नवभारतं मम भारतम् ।।3।।

शंखैरसंख्यैः गुञ्जितं
मधुरस्वरैः सम्मोहितं
घण्टा-निनाद-सुवादकं
नवभारतं मम भारतम् ।।4।।

नवरेलयान-सुचालकं
रघुराममन्दिर-स्थापकं
कृतसाधुवैश्विकमेलनं
नवभारतं मम भारतम् ।।5।।

विश्वं च पश्यति भ्रातृवत्
रक्षत्यहो तं मातृवत्
लोभं विना जन-पालकं
नवभारतं मम भारतम् ।।6।।

भाति स्वयं स्वर्णोपमं
रजतोपमं कान्तिप्रदं
रत्नप्रदं स्वर्गोपमं
नवभारतं मम भारतम् ।।7।।

रक्तेन संचित-भूधरं
रघुवंश- मुक्तिप्रदायकं
रम्यं प्रियं रामालयं
नवभारतं मम भारतम् ।।8।।

## काव्यैकादशी



-डॉ. अरविन्दकुमारतिवारी

पदं प्रतिष्ठां परमां सदुक्तिं
विज्ञाः प्रकामं प्रसमीक्ष्य वाणीम्।
वदन्ति मूढाः शठबुद्धिवृद्ध्या
वागेव भूषा महतां मनोज्ञा ।। १
हलाद् दूरं बलाद् दूरं चलाद् दूरं यदा-कदा।
खलाद् दूरं मलाद् दूरं स्थातव्यं सुजनैस्सदा।। २
सोढ्वा दुःखशतं प्रसूय पयसा सम्पोषयन्ती गृहे
पुत्रे रोदिति धावते झटिति या दूरादहो व्याकुला।
अङ्के स्वाञ्चलविष्टरे प्रियशिशुं सा शाययन्ती स्वरैः
आमोदं तनुते न कस्य गृहिणो माता परा देवता।। ३
लब्ध्वा जन्म मनुष्यवंशभवने पीत्वा जनन्याः पयो
धृत्वा पूज्यपितुः कराङ्गुलिमहो बुद्ध्वा जगद्रत्नम्।
नत्वा सद्गुणगौरवं गुरुवरं गीतां पठित्वा नरो
भुक्त्वा कर्मफलं प्रयाति मुदितो मुक्त्वा द्रुतं बन्धनम्।। ४
पादं निर्दहति ध्रुवं प्रणतवान् यः संस्पृशन् भीषणो
देहं ज्वालयतीव सादरमसौ संसेवमानो मुहुः।
कण्ठं शोषयति प्रियं बहु सरन् तापं तनोत्यागतः
कोऽयम्भोः! खलराडसौ? न हि सखे! ग्रीष्मातपस्तापकः।।५
भार्या यस्य मनोरमा सुगृहिणी कार्यान्तराद् बन्धवः!
दूरे सम्प्रति वर्तते सतनया तस्यारविन्दस्य मे।
दुःखं ग्रीष्मदिनेषु सौख्यभरितं पाकालये वर्द्धते
दूयन्ते न कथं विना स्वगृहिणीशून्या जनाः सर्वथा।। ६
जिह्वा मूर्च्छति वेदना शिरसि हा संवर्द्धते सत्वरं
शुष्कः क्रन्दति मे गलो नयनयोरग्रेऽस्ति सूर्यातपः।
तप्तं विष्टरमाश्रये मुहुरहं शीतं जलं सम्पिबन्
हं हो! ग्रीष्म! समागतोऽसि भुवनं कस्माद्वसन्तेऽधुना? ७
गर्जन्तु केचित् सुखमदधाना
वर्षन्तु केचिन्मुदमधानाः।
ग्रीष्मातपैस्तप्तमनस्विनां नः
स्वेदो मसीं नन्दयतीति विद्मः।। ८
सतां मैत्रीगतिर्लोके शनिगतिमती मता।
असतां मित्रतावेगः शशिवेगसमो मतः।। ९
पुत्रः समाह्वयति मातरमेव दुःखे
सौख्ये सदा स्मरति मातरमेव लोके।
स्वप्ने मुदालपति मातरमेव वन्द्यां
मृत्वापि जीवति सदा जननी जगत्याम्।। १०
कुक्षौ मुदा वहति सन्ततिकामदूना
सोढ्वापि दुःखमखिलं व्यथते न खिन्ना।
देवी सदैव महिता गृहकार्यलीना
पुत्राय किन्न कुरुते वसुधा नवीना।। ११

## मनो दूयते

- डॉ. सत्येन्द्र पाण्डेयः
आरानगरम्, बिहारः

येन कार्यं कृतं प्राणपण्येन वै
जीवनं कर्मभूमौ व्यतीतं सखे!
लालसा तस्य नैव यदा पूर्यते।
वच्मि सत्यं तदा मे मनो दूयते।।1

यो गृहञ्चैव भूमिं परित्यज्य वै
दूरदेशं निवासाय गच्छत्यहो!
ईहमानो न देशं परावर्त्तते
वच्मि सत्यं तदा मे मनो दूयते।।2

ग्रामवीथ्यां स्वतन्त्रं चरन्तिष्ठति,
मुक्तभावेन यो जीवनं जीवति।
तन्नगर्यां यदा झुग्गीमासेवते
वच्मि सत्यं तदा मे मनो दूयते।।3

नीतिनिर्मातृसन्नायक! श्रूयताम्
स्वार्थसिद्धिं विहायोद्यमः सृज्यताम्
येन संघोष्य पश्चाद्धि विस्मर्यते
वच्मि सत्यं तदा मे मनो दूयते। 4

हे प्रभो! जीवनं दास्यते चेत्कलौ,
उद्यमैर्हीनतायाः न दुःखं भवेत्।
सन्ततिस्ते विना कर्मणा पीड्यते,
वच्मि सत्यं तदा मे मनो दूयते।।5

श्रमिकदिवसमुपलक्ष्य प्रस्तूयते पद्यपञ्चकमपद्यपञ्चक

## निदाघगानम्



- राजेन्द्र त्रिपाठी रसराजः
प्रयाराजः

प्रचण्डोऽस्ति भानुः दहति मातृभूमिः।
तृषापीडितेयं ज्वलति मातृभूमिः।।

स्वनिर्वाचने वन्दयति लोकतन्त्रम्।
निदाघे प्रचारैस्तपति मातृभूमिः।।

स्वकीया प्रजातिः त्वदीया प्रजातिः।
प्रजानां दशां दर्शयति मातृभूमिः।।

क्वचिद्घोषणानां चलति तीक्ष्णवायुः।
क्वचिद् भाषणैर्मोदयति मातृभूमिः ।।

कथं चीयते चिन्तयति राजनेता।
जनाधारमाप्तुं जपति मातृभूमिः।।

इतोऽहं ततोऽहं चरति योगदानम्।
अहो राजभक्त्या भजति मातृभूमिः।।

प्रजानां प्रभावो मिलति लोकतन्त्रे।
इदानीं महत्त्वं किरति मातृभूमिः ।।

समेषां समक्षं नमति राजनेता।
स्वदेशं धनैः पालयति मातृभूमिः।।

जनं सद्गुणं वीक्ष्य मतदानकार्ये।
प्रजानां मनः प्रेरयति मातृभूमिः।

## वैराग्य-पञ्चकम्



डॉ.शशिकान्ततिवारी
'शशिधर'

नित्यस्त्वं शुभदर्पणेन सदृशस्स्वच्छस्तथा निर्मलो
निर्द्वन्द्वो निरुपाधिको निरुपमो निर्गन्धनिर्वासितः।
नैकेषां निजजन्मनामिह मलैर्जातोधुनाच्छादितः
त्यक्त्वा द्वन्द्वभरं प्रपञ्चमखिलं गच्छेश्शरण्यं प्रभो।।56।।
छित्त्वा देहजबन्धनं निजमिदं हत्वा च मायामहो!
ज्ञात्वा स्वं शिवरूपमद्भुतमिदं स्मृत्वोमरत्वं निजम्।
ध्यात्वा ब्रह्मपदं क्षयादिरहितं मत्वा स्वकं शाश्वतं
त्यक्त्वा हेयमिदं प्रपञ्चमखिलं गच्छेश्शरण्यं प्रभो।।57।।
नाट्यक्षेत्रमिदं जगद्भगवतस्त्वं पात्रभूतोद्भुतस्
सद्द्रष्टा खलु सौमिकस्स भगवांस्त्वं नर्त्तकः केवलम्।
संसारः खलु रंगमञ्चसदृशो नैवञ्च तत्त्वात्मकं
त्यक्त्वोतत्त्वमयं प्रपञ्चमखिलं गच्छेश्शरण्यं प्रभो।।58।।
विश्वासो नहि जायते मनसि चेद्गीताशरण्यं व्रजे
वेदान्तोपनिषत्पुराणशरणङ्गच्छेः पठेर्नित्यशः।
अस्मच्छास्त्रमहो वदत्यनुदिनं सर्वञ्जगन्नश्वरं
त्यक्त्वा विश्वमिदं प्रपञ्चभरितं गच्छेश्शरण्यं प्रभो।।59।।
आयातो भुवि नैव किञ्चिदपि ते पाणौ तदोसीत्सखे!
भूमेर्यास्यसि नैव किञ्चिदपि ते हस्ते भविष्यत्यहो!।
मिथ्या रोदसि मित्र! वस्तुगमने पुत्रे कलत्रे गते
त्यक्त्वा मोहमयं प्रपञ्चमखिलं गच्छेश्शरण्यं प्रभो।।60।।

■■■

विश्वासं पितरीह नैव कुरुते पुत्रः पिता नो सुते
भार्या नैव च भर्त्तरीह न पतिर्नैजे कलत्रे तथा।
राजा नो जनतासु नैव जनता राज्ञीह किं कथ्यतां
त्यक्त्वा त्याज्यमिदं प्रपञ्चमखिलं गच्छेश्शरण्यं प्रभो।।61।।
दन्ता दर्शनरूपिणः पृथगहो भोज्या पृथक्सन्त्यहो!
मिथ्यारूपमुखं बहिर्भवति वै गुप्तं मुखन्तात्त्विकम्।
सर्वेपीह नरः परस्परमिमे कुर्वन्ति संवञ्चनं
त्यक्त्वा धूर्तमयं प्रपञ्चमखिलं गच्छेश्शरण्यं प्रभो।।62।।
नैवं वञ्चति मानवः पशुमहो नो पक्षिणः केवलं
नैवोसौ प्रकृतिं नदीञ्च धरिणीं नो पादपान्निर्मलान्।
आत्मानं भगवन्तमप्यनुदिनं वञ्चन्त्यहो! दुष्टकाः
त्यक्त्वा वञ्चनगं प्रपञ्चमखिलं गच्छेश्शरण्यं प्रभो।।63।।
साधुस्साधुमहो गुणी च गुणिनं पापी तथा पापिनं
दृष्ट्वा वै बलिनं बली च धनिकं द्वेष्टीह नित्यं धनी।
सर्वेषु ज्वलनप्रवृत्तिरधुना संवर्धते नित्यशः
त्यक्त्वा भ्रष्टमिदं प्रपञ्चमखिलं गच्छेश्शरण्यं प्रभो।।64।।
माता वित्तमहो पिता धनमहो पुत्रो धनं केवलं
धर्मो वित्तमहोद्य कर्म हि धनञ्जातं धनं साधनम्।
साध्यञ्चैकधनार्जनं हि जगतोर्नान्यत्सखे! निश्चितं
त्यक्त्वोतत्त्वमिदं प्रपञ्चमखिलं गच्छेश्शरण्यं प्रभो।।65।।

चतुर्थपुटस्य शेषभाग:

## वेदान्तपञ्चदशी पञ्चमप्रकरणम् ( महावाक्यानुशीलनम् )

दज्ञानोपहितं चौतन्यं जीवसंज्ञमित्यभिधीयते यदा च तत्त्वज्ञानेन सर्वोपाधय: निरस्यन्ते तर्हि जीवो लब्धस्वरूपो भवतीति।

(२)अस्मिन् विद्याधिकारिणि देहे

श्लोकेऽस्मिन्''विद्याधिकारिणि देहे 'इति प्रयोगो मानवदेहस्य वैशिष्ट्यं ध्वनयति देहेनानेनैवात्मनि:श्रेयसाधिगमाय भक्तिकर्मज्ञानजपतपशमदम- श्रवणमननाद्यनुष्ठानानि सम्पद्यन्ते नान्येषां देहव्यतिरिक्तं साधनान्तरं भवतीति निश्चप्रचम्।

अतो यो जिज्ञासुर्मनुष्य: सद्गुरुशास्त्रोपदिष्टविधिना साधनचतुष्टयसम्पन्नस्सन्ननारतं श्रवणमननादितत्परो भवति तद्देह एवात्र 'विद्याधिकारिदेह:'इत्युच्यते[विद्याया अधिकारी देहस्तस्मिन् विद्याधिकारिदेह:]।

[४] बुद्धे: साक्षितया स्थित्वा स्फुरन्नहमितीर्यते

शामदमादिसाधनसम्पत्तियुक्ते ब्रह्मविद्यावाप्त्यर्हे श्रवणमननाद्यनुष्ठानसम्पन्ने बुद्धे: साक्षित्वेनावस्थाय प्रकाशमानो भवति योऽनन्त:परिपूर्णो देशकालाद्यनवच्छिन्न:परात्मा परमात्मा स एवास्मिन् श्लोकेऽहंपदेन लक्ष्यार्थीभवति। अहमितिशब्दस्य लक्ष्यार्थविवेचनोत्तरमधुना ब्रह्मशब्दार्थ उदीर्यते 'स्वत: पूर्ण: परात्माऽत्र ब्रह्मशब्देन वर्णित:।

अस्मीत्यैक्यपरामर्शस्तेन ब्रह्म भवाम्यहम्'।'

(पञ्चदशी,५.४)

अन्वय: स्वत: पूर्ण: परात्मा अत्र ब्रह्मशब्देन वर्णित: अस्मिन् इति ऐक्य परामर्श: तेन अहं ब्रह्म भवामि।

'स्वत:'इति पदेन परमात्मन: किञ्चिदन्यद्बाह्योपकरण-साहाय्यापेक्षाराहित्यं व्यज्यते। श्रुतिषु तन्निमित्तोपादानकारणद्वयप्रतिपादनाय (तत्सुकरावगमाय च)लूताकीटस्य दृष्टान्त: प्रस्तूयते यदनुसारेण स्वेतरबाह्योपकरणसहायानपेक्षत्वपुरस्सरं स्वीयां प्रकृतिमाश्रित्य जगन्नानानामरूपव्याकरणं तदद्भुतं महनीयं वैशिष्ट्यमिति वक्तुं शक्यते।

अत्र स्वतस्स्वभावत: पूर्ण: परात्मा परमात्मा ब्रह्मशब्देन व्यपदिश्यते बृहबृहि इति वृद्धर्थकं भौवादिकं धातुद्वयम्।बृहिधातोर्मनिन् प्रत्यये सति ब्रह्मशब्दो व्युत्पद्यते य: परमतत्त्वस्य निरतिशयबृहत्त्वमहत्त्वादिकं व्यनक्ति नित्यशुद्धबुद्धमुक्तस्वभावसत्यज्ञानादिकं ब्रह्मणो यल्लक्षणं निरूपितं भवति तत्सर्वं बृहिबृद्धाविति ब्रह्मपदेन पूर्णतया प्रतीयन्त इति नात्र सन्देह:। अनुवर्तिष्यते

## श्रीजगन्नाथो वणिग् भक्तश्च

**मूलओडियाकथाकार:-गणेशप्रसादपरिजा**

**अनुसर्जिका - पराम्बाश्रीयोगमाया**

श्रीजगन्नाथस्य पण्डासेवकेषु महान् विचार: प्रचलति। सर्वेषां मुखेषु एकैव चर्चा। दुग्धरसो यत्र चत्वारि पैसापरिमितमथवा षदैसापरिमितं घृतस्य मूल्यं यत्र सेरं (एककिलोमितात् किञ्चिदधिकं) प्रति द्वादशनाणकमथवैकरूप्यकं तत्रैकलक्षरूप्यकाणां का भोगसामग्री भगवते समर्पयिष्यते? रूप्यकं तु नैकशतं सहस्रं वापित्वैकलक्षम् !

सर्वे चिन्तिता व्यस्ताश्च। बहुचिन्तनादनन्तरमपि ते न स्थिरीकर्तुं शक्नुवन्ति यदेकलक्षरूप्यकै: का भोगसामग्री भगवते समर्पयिष्यते? तर्हि किं निराकरिष्यन्ति यदेकलक्षरूप्यकाण्यधिकानि भवन्ति। मूल्यं किञ्चिन्नूनीकुर्वन्त्विति।

परन्त्वैतत्तु लज्जाकरं भविष्यति। यो जगतो नाथो यो महाबाहुर्यस्य नेत्रे सुविशाले उदरं बृहन्मन्दिरं महत् वीथी महती तत्सविधे एवं किञ्चिन्मूल्यवत्तरं द्रव्यं नास्ति यद्भोगसामग्रीरूपेणार्पयिष्यते? वस्तुत एष: परितापस्य विषय:।

भोगसामग्रीषु नवनीतं मूल्यवत्तमम्। नवनीताद् घृतं भवति। केवलं घृतेन किं वा भोगद्रव्यं भवितुमर्हति ? मिश्रकं नवनीतञ्च मेलयित्वा यदि भोगपदार्थो विनिर्मित: स्यात्तर्हि त्रिमूर्त्त: कृते दशसहस्ररूप्यकाण्यलम्। एतत्तु पुनर्लक्षपरिमितं धनम्!

दिनद्वयाटु हाइदरावादत एक: वणिक् समागतोऽस्ति । भगवति जगन्नाथे तस्यासीमा भक्ति:। स इच्छति भगवते नैवेद्यसमर्पणार्थम्। परन्त्वैक एव पदार्थो य एकलक्षमूल्यात्मक: स्यात्।

वस्तुतो धनवन्तो यात्रिका: भगवत: समीपे तेषां नाम्ना नैवेद्यार्पणार्थ पण्डासेवकेभ्यो निवेदयन्ति। यात्री स्वशक्त्यनुसारं दिनकतिपयपर्यन्तं मिश्रकनवनीतादिनैवेद्यार्थं रूप्यकाणि प्रदाय प्रतिगच्छन्ति। दिनैकं दिनद्वयं वा श्रीक्षेत्रेऽवस्थानं कृत्वा तन्नैवेद्यार्पणं ते साक्षात्कुर्वन्ति । तत: परं पर्यायक्रमेण पूजाकर्मणे नियुक्ता: सेवका: जगन्नाथनाम्ना नैवेद्यार्थमाचमनं कृत्वा परिवारपोषणं कुर्वन्ति । सर्वव्यापक: स: कलाठाकुर: (कृष्णेश्वर:)। तस्य सेवकानां भारो स वहति। परन्त्वत्र धनिको वणिक् तन्नेच्छति। स वदति यदेकस्मिन्नेव दिने तस्य नैवेद्यसामग्री भगवते विनिवेदयिष्यते। अन्यथा तस्य प्रत्यावर्त्तनादनन्तरमेकलक्षरूप्यकाणि?

आनन्दविपणी (यत्र श्रीजगन्नाथस्य महाप्रसादो मिलति) विश्वस्य सर्वश्रेष्ठो भोजनालय:। अन्नादारभ्य लडुकादिकं विविधप्रकारके मिष्टान्नं यावत् सर्वो महाप्रसाद:। श्रीपुरुषोत्तमक्षेत्रं त्यक्त्वान्यत्र कुत्रापि भगवतो नैवेद्य महाप्रसाद इति नोच्यते। महाप्रसादघ्सेवने जातिभेदो नास्ति। चण्डालहस्तादु ब्राह्मणोऽपि गृह्णाति। जातिवादस्य प्रश्नोऽत्र नास्ति। केवलं विधर्मिणां कृते श्रीक्षेत्र निषिद्धमस्ति श्रीमहाप्रसादस्यापि निषेध:। एतादृशे महाक्षेत्रे एकलक्षरूप्यकाणां नैवेद्यनिवेदनादनन्तरं सर्वे: सहोपविश्य महाप्रसादसेवनं करिष्यतीति वणिगिच्छति। परन्तु एवं मूल्यवत्तरं नैवेद्ययं किमस्ति यदेकलक्षरूप्यकै: निर्मास्यते?

सुआरसेवका: (श्रीमन्दिरस्य पाचका:) नियोगसेवका: (श्रीमन्दिरस्य नीतिपरिचालकसेवका:) च चिन्तयित्वा चिन्तयित्वा क्लान्ता जाता:। कस्यापि बुद्धौ न किशिदु भाति यदेकलक्षरूप्यकैर्भगवते किं नैवेद्यमर्पयिष्यते इति? अन्त पतत् स्थिरीकृतं यदु भगवते जगन्नाथाय निवेदयिष्यते। स एव निर्देशविष्यत्यैकलक्षरूपकाणां कीदृशं नैवेद्यं स इच्छतीति।

स तु रक्तमांसशरीरधारी नास्ति पेन तस्य सम्मुखे कथनमात्रेण स उत्तरयिष्यति। तस्मै निवेद्य तस्मादुत्तरप्राम्यर्थ तत्सभिधे उपयासपूर्वक ध्यानमावश्यकम् (ओडिआभाषया धारणा इति उच्यते। वणिक्वेष्टित: स: किं नैवेद्यमिच्छति तत्तु स एव बदिष्यति।

अत: श्रीजगन्नाथस्य पण्डासेवको जगन्नाथस्य सविधे ध्यानरतो जात:। भक्तिपूतमनसा आत्मनिवेदनपूर्वकं स्वस्यासहायतां मन: प्राणपूरितां कृत्वा भगवते निवेदितवान्। हे महाप्रभो! समागतस्य श्रेष्ठिन एकलक्षरूप्यकै: कि नैवेद्य भवते निवेघयिष्यते तत्त्वां विना नास्ति कोऽपि समर्थो वक्तुमिति।

वणिम् जगतशेठोऽपि चिन्तित:। दीर्घकालं यावत् स: पुरुषोत्तमधाम्नि स्थातुं न समर्थ:। न कोऽपि तथास्ति यस्तस्य वाणिज्यादिकं निरीक्षणं करिष्यति।

नैवेद्यसमर्पणादनन्तरं स: प्रत्यावर्त्तिष्यति। प्रात:काले आगत्य पण्डासेवक: रूप्यकाणि तस्मान्नयेत्। परन्त्विदानीं मध्याई यावन कोऽपि दृश्यते।

तस्य विव्रतावस्थां दृष्ट्वारसेवक एक आगत्य विज्ञापितवान् यत् पण्डासेवकस्तस्य कृते एव भगवत: सविधे ध्यानरतो भगवत इच्छां ज्ञातुम्। महाप्रभु: स्वयं वदिष्यति तस्य नैवेद्यविषये इत्यत्यन्तं गौरवावहं भाग्यम्। जगतशेठ आनन्दितो जात:। अस्तु। एतदर्थं यदि दिनैके दिनार्थं वा बिलम्बितं स्यात्तस्य न कापि हानिर्भवति। भारतवर्षस्य चतुर्धाम:सु श्रीपुरुषोत्तमक्षेत्रस्य स्वतन्त्रं महत्त्वं वरीवर्त्ति । तत्र पुन: जगन्नाथ: स्वयं निर्देशयिष्यत्यैकलक्षरूप्यकै: किं नैवेद्यं स ग्रहीष्यतीति। महत् सौभाग्यमेतत् ।

ब्रह्माण्डनाथस्य समीपे एकलक्षरूप्यकाणि कति बा? परन्तु सेवकानां कृते मूल्यमेतद्वरुधिकम्। परिशेषे महाप्रभोर्विचारसभायां तस्य निवेदनस्य श्रवणमभवत्। ध्यानरत: सेवको भगवन्तमपश्यत्तस्य मुखारविन्दादशृणोच्च। महाप्रभुना जगन्नाथेनोक्तं यटु वणिजं कथय तस्मात् ताम्बूलमेकमास्वादयितुं मदीयेच्छा। प्रतिदिनं मधुरं ताम्बूले भुक्त्वा रुचिपरिवर्तनायेच्छा भवति। जगतशेठस्य यत्ताम्बूले ग्रहीष्यामि तत्र चूर्णलेपितं भविष्यति। परन्तु तत् चूर्ण समुद्रजीवानां भस्म न भविष्यति। तत् भविष्यति गजमौक्तिकस्य चूर्णम्। शुद्धं गजमौक्तिकं भस्म भूत्वा चूर्णरूपेण तत्र ताम्बूले लेपितं स्यात्। भ्रताभगिनीभ्यां सह तचूर्णलेपितं ताम्बूलमस्माकमावश्यकम्। आदी ताम्बूलभक्षणम्। तत: परं कि नैवेद्यमावश्यके तज्ज्ञापयिष्याम:।

एतत् सर्व सूचयितुं श्रीजगन्नाथस्य पण्डासेवको धावितवान् वणिक्समीपम्। भगवता जगन्नाथेन किं विज्ञापितं तज्ज्ञातुं वणिक प्रतीक्षारत:। पण्डासेवकोऽपि यथा दृष्टं श्रुतश्च तत् वर्णितवान्। एतन्न किञ्चिद्वृहद्रव्यमपितु ताम्बूलमेकं यत्र गजमौक्तिकं चूर्ण भविष्यतीति पण्डासेवकस्योक्तिरासीत्।

परन्त्वैतच्छ्रवणमात्रेण वणिजो मुर्ख विषर्ण जातम्। गजमौक्तिकम्। सर्वेषां गजानां मस्तके मौक्तिकं न भवति। लोककथा वर्त्तते यद् हस्ती जीवितावस्थायां लक्षमूल्यात्मको मृतेऽपि लक्षात्मकक्षेति। मौक्तिकस्य कृते कतिसंख्याकानां हस्तिनां हननं स्यात् पुनरेकस्मिन् हस्तिनि कियद् वा मौक्तिकम् वणिजो जगतशेठस्य मस्तकं परिघूर्णितं जातम्। भगवते श्रीजगन्नाथाय ताम्बुलमेकं प्रदातुं तस्य शक्तिर्नास्ति। स वा किं नैवेद्यद्रव्यं प्रदातुं क्षम:?

मस्तकादुष्णीषमवतार्य नग्नपादाभ्यामेकलक्षपरिमितस्य घनस्य स्थली धृत्वा श्रीमन्दिरं प्रति गतवान् वणिम् जगतशेठ:। तमनधावितवन्त: पण्डासेवका अवरसेबकाश्च। हाइदावादस्य कोटिपतिरिति मानोन्मत्त: वणिक प्रचलति झानमुखेन।

श्रीमन्दिरे भगवत: सम्मुखं प्राप्य स वणिगुञ्चस्वरेण कन्दितवान्। हे महाबाहो ! भवत्सविधे मयापराध: कृतोऽस्ति । भवते ताम्बुलमेकमेर्पणाय मदीया शक्तिर्नास्ति। मया किं वा नैवेद्यद्रव्यं भोगाय समर्पयिष्यते? वणिग् जगतशेठो रूप्यकस्थलीमध: स्थापयित्वा भगवत: सम्मुखे साष्टाङ्गप्रणिपातमुद्रया पतितवान्। तस्य लोतकधारया तन्मन्नसो धनमदोऽपगत:। साभार: कथासरित्...


## कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयस्य महाकविकालिदास-संस्कृतव्रति-राष्ट्रियपुरस्कारस्य आवेदन/नामनिर्देशनपत्राणाम् आह्वानम्

'सारस्वतभू:' इति विदर्भस्य ख्याति: । अस्यैव विदर्भप्रान्तस्य रामटेकनगरे महाराष्ट्रसर्वकार: संस्कृतस्य प्रचार-प्रसारार्थ 1997 तमे वर्षे संस्कृतविश्वविद्यालयस्य स्थापनामकरोत्। रामटेकनगरस्य रामगिर्याश्रमे एव निवासं कृत्वा महाकविना कालिदासेन मेघदूतम् इति खण्डकाव्यं विरचितमिति सर्वविदितम् । अत एव महाराष्ट्र-शासनेन संस्कृतविश्वविद्यालयस्य नामकरणं 'कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालय:' इति कृतम् । भारतदेशे विद्यमानेषु 16 संस्कृतविश्वविद्यालयेषु अन्यतमोऽयं विश्वविद्यालय: । अस्य कार्यक्षेत्रं सम्पूर्णमहाराष्ट्रराज्यं भवति ।

कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयस्य पक्षत: स्थानिक-प्रशासनस्य सहकार्येण प्रतिवर्षं पं. श्री. रामनारायणशर्मण: स्मृतौ महाकवि-कालिदास-संस्कृतव्रति-राष्ट्रिय-पुरस्कार: प्रदीयते । यै: विद्वज्जनै: संस्कृतभाषाया: संवर्धनाय, रक्षणाय प्रसारप्रचाराय च स्वकीयं जीवनं समर्पितम् । एवमेव यै: संस्कृतसंशोधनक्षेत्रे विशिष्टं कार्यं विहितं तेभ्य: यथोचितं गौरवप्रदानमिति प्रस्तुतपुरस्कारस्य प्रयोजनम् । अत्र हि ज्येष्ठविद्वद्भ्य: पञ्चाशत्सहस्ररूप्यकाणि, युवविद्वद्भ्य: पञ्चविंशतिसहस्ररूप्यकाणि गौरवपत्रञ्च पुरस्काररूपेण प्रदीयते ।

इदं पुरस्कारप्रदानस्य त्रयोदशवर्षम् । इत: पूर्वं महामहोपाध्याय: पद्मश्री: सत्यव्रतशास्त्री, महाकवि: श्री ग. बा. पळसुले, महामहोपाध्याय: श्रीपुलेल्ल: श्रीरामचंद्रुडु, महामहोपाध्याय: प्रा. रमारंजनमुखर्जी, मा. प्रा. राधावल्लभ: त्रिपाठी, डॉ. का. इ. देवनाथन्, प्रा. मिथिलाप्रसाद: त्रिपाठी, म. म. भगीरथप्रसाद: त्रिपाठी, पं. वसन्त: गाडगीळ:, डॉ. लीना रस्तोगी, प्रो. वसंतकुमारभट्ट:, डॉ. शतावधानी गणेश:, प्रो. देवीसहायपांडेय:, प्रो. के. रामानुजाचार्य:, डॉ. मणि द्रविड:, प्रो. एस्. आर्. लीला, प्रो. रामकृष्णामाचार्यालु, प्रो. पी. सी. मुरलीमाधवन्, प्रो. अरिंदम चक्रवर्ती, प्रो. रामसुब्रमण्यन्, प्रो. बलराम शुक्ल, प्रो. वेंकटेश पै इत्येते महान्त: पुरस्कारेणानेन सन्मानिता: ।

वर्षेऽस्मिन्नपि (2024) अनेन विश्वविद्यालयेन अस्मै पुरस्काराय आवेदनपत्राणि ज्येष्ठविद्वद्भ्य: आहूयन्ते । अयं पुरस्कार: युवविद्वद्भ्यश्च दीयते । ज्येष्ठविद्वत्प्रवर्गे आवेदकानां आयु: पञ्चपञ्चाशत् (age 55 yrs & above)अथवा तदधिकं वा भवेत् । तथा युवप्रवर्गे आवेदकानां आयु: चत्वारिंशद्वर्षत: पञ्चपञ्चाशद्वर्षपर्यन्तं (age 40 to 55 yrs-) भवितुमर्हति । यै: संस्कृतक्षेत्रमभिलक्ष्य विशिष्टं कार्यं कृतमस्ति अथवा अन्यस्या: भाषाया: संस्कृतभाषायाम् अनुवाद: विहित: संस्कृतक्षेत्रे राष्ट्रियस्तरे अन्ताराष्ट्रियस्तरे वा संशोधनं वा स्वकीयं योगदानं प्रदत्तं ते सर्वेऽपि स्वीयम् आवेदनपत्रं चतसृभि: प्रतिभि: सह तथा च सॉफ्टकॉपीसहितं 1 मे 2024 पर्यन्तं कार्यालयं प्रति प्रेषयन्त्विति विश्वविद्यालयस्य कुलसचिवेन प्रो कृष्णकुमार पांडेयमहोदयेन प्रार्थ्यन्ते । तथा च सन्मान्यसंस्कृतसंस्थाया: प्रमुखा: अथवा संस्कृतविद्वद्वरेण्या: अपि अस्य पुरस्कारार्थं नामनिर्देशनं कर्तुं शक्नुवन्ति।

यै: आवेदकै: गतवर्षे अस्मै पुरस्काराय प्रस्ताव: प्रेषित: तै: केवलं नूतनप्रकाशनस्य अथवा नवोपलब्धे: निर्देशं कृत्वा पत्रं प्रेष्यताम् इति प्राथ्यर्ते ।

आवेदनपत्राणां प्रेषणाय सङ्केतस्थानम्
प्रो कृष्णकुमार पांडेय:, कुलसचिव:
कविकुलगुरू-कालिदास-संस्कृत-विश्वविद्यालय:,
प्रशासकीयभवनम्, मौदामार्ग:,
रामटेकम् - 441106, जिल्हा-नागपुरम् , महाराष्ट्रम्
Please send the soft copy of the application to the E-mail ID - registrar@kksu.org/pro@kksu.org

# संस्कृतसंस्कृतिसंस्काराणां रक्षणार्थं संतसम्मेलनम् आयोजितम्

भोपालः (संवाददाता ) पिपलिया बाजबा खां ,भोपाले एतन्निमित्तं विशाल संस्कृत संत सम्मेलनस्य आयोजनं जातम्। पण्डित अशोक कृष्ण शास्त्रिणः संयोजने सम्मेलनस्य अध्यक्षतां श्रीमज्जगद्गुरुः रामानुजाचार्य श्रीस्वामी वासुदेवाचार्य विद्याभास्करः अकरोत्। मुख्यातिथिः डॉ






राधावल्लभ त्रिपाठी, पूर्वकुलपतिः विशिष्टातिथिः ललिताम्बापीठाधीश्वरः, आचार्यः जयरामदासः, डां रमाकांत पाण्डेयः निदेशकः केंद्रीय संस्कृत विश्वविद्यालयः, भोपालः ,प्रो सनन्दन त्रिपाठी, डां लक्ष्मीनारायण पाण्डेयः, डां.ऋषिकुमार तिवारी, श्रीधामवृंदावनतः डा दाताराम पाठकः आचार्य उमेश पाठकः इत्येते प्रमुख विद्वांसोऽपिभी उपस्थिताः।

संस्कृतं प्रति रुच्युत्पालनाय प्राचीन परंपराभिर्युक्तगुरुकुलानि प्रारभ्येरन्। येन संस्काराः बालेषु आगच्छेयुः। संस्कृत भाषा सर्वेभ्यः अनिवार्या। ब्राह्मण बालकानां रुचिः संस्कृतं प्रति बर्धताम् इति उद्देश्येन सह संस्कृत भारती द्वारा शिविरिणाम् आयोजनं गुरुकुलेषु भवेत्।

केंद्रीय संस्कृत विश्वविद्यालय-भोपालेन अधिकृत श्री भोजराज पञ्चागस्य विमोचनं अस्मिन् अवसरे डां राधावल्लभ त्रिपाठी अकरोत्। तेनोक्तं पञ्चाङ्गम् अत्यन्तम् उपयुक्तम् स समाजे संस्कृतं प्रति रुचिजागरणं भवेत्। डां ऋषिकुमार तिवारी (श्रीधामवृंदावनम्) कथितवान् यत् ब्राह्मणानां मुख्य कर्तव्यं यत् नित्य संध्या वंदनं कुर्युः संस्कृतं पठेयुः स्वीयबालेभ्यः संस्कृतं पाठयेयुः व्याकरणेन सह संस्कृत संस्कृत वाग्मयज्ञानमपि भवेत् स भारतीय संस्कृतेः वेदाः मुख्यांगभूताः सममेव ब्राह्मणानां मुख्यं कर्तव्यं संध्या वंदनम् , यस्य पालनम् अत्यावश्यकम्।






# कश्मीरस्य शंकराचार्यमंदिरे शंकराचार्यजयंती भव्यरूपेण आयोजिता

राजौरी। आदि शंकराचार्यस्य जयंतीम् आलक्ष्य गोपाद्री पर्वते स्थिते प्राचीन शंकराचार्य मंदिरे वैदिक मंत्रोच्चारणेन कश्मीर पर्वतद्रोणी गूंजिता। मंदिरे विशेषेण पूजार्चनया यज्ञः अपि सम्पन्नः। देशस्य एकता, अखंडता दृढीकर्तुं राष्ट्रस्य संत महात्मनः कार्यक्रमे सम्मिलिताः। अस्मिन् अवसरे स्वामिविश्वात्मानंद



सरस्वतीमहाराजस्य नेतृत्वे श्रीनगरे शोभा यात्रा निर्गता।

उल्लेखनीयं यत् शंकराचार्य जयंती सनातन धर्मस्य एकः महत्वपूर्णोत्सवः। अष्टमशताब्द्याम् आदि शंकराचार्यः महान्तं समयं यावत् अत्र तपस्यां कृतवान् । तदारभ्य भगवच्छिवमंदिराय शंकराचार्य मंदिर रूपेण मान्यता लब्धा। गताष्टवर्षेषु स्वामी विश्वत्मा नंद सरस्वती महाराजः शंकराचार्य मंदिरे प्रतिवारं कार्यक्रमं कुरुते। महामंडलेश्वर अक्षरानंद, महामंडलेश्वर दिव्य आनंदेन सहिताः महतीसंख्यायाम् अत्र संत महात्मनः प्राप्ताः। कार्यक्रमे सम्मिलितेषु सर्वेषु श्रद्धालुषु केनचित् प्रकारेण भयं नासीत्। सर्वोऽपि भक्तौ लीनः।

# उत्तरप्रदेशसंस्कृतसंस्थानेन सञ्चालितः पुरोहितप्रशिक्षणस्य शुभारंभः जातः

बदायूं। भगवान परशुराम आदर्श जूनियर हाई स्कूल कृष्णापुरी सिविल लाइंस बदायूं इत्यत्र पौरोहित्य



प्रशिक्षणम् आरब्धम् । केंद्राध्यक्षा श्रीमती इंद्राणी पाठकः मुख्यातिथिः आचार्य राधेश्याम अवस्थी रसेंदुः विशिष्टातिथिः श्री गुरु चरण मिश्रः ब्राह्मण महासभा अध्यक्षः प्रदीपः , मंच संचालकः राजेश्वर पाठकः पौरोहित्य प्रशिक्षकः विपिन कुमार पाठकः च दीप प्रज्वलनं माल्यार्पणं विधाय मंगलाष्टक पाठेन कार्यक्रमं शुभारब्धवन्तः पौरोहित्य प्रशिक्षक द्वारा आगंतुक अतिथीनां माल्यार्पणं जातम्। तदुपरांतं मुख्यातिथिः आचार्य रसेन्दुः कथितवान् यत् सनातन धर्मस्य मेरुदंडिका समानमेव पौरोहित्य कर्मकांडः अनेन विना समाजः अर्धः एव न अपितु नग्नः प्रतीयते। अस्मिन् क्रमे विशिष्टातिथिः श्री गुरु चरण मिश्रः कथितवान् कर्मकांडं बिना समाज संस्कार विहीनः। कार्यक्रमे पौरोहित्य प्रशिक्षकः विपिन कुमार पाठकः कथितवान् यत् उत्तर प्रदेश संस्कृत संस्थानस्य निर्देशानुसारं बारं-बारम् उद्घाटनं गंगास्नानमिव पवित्र मान्यताम्। केंद्राध्यक्षा श्रीमती इंद्राणी पाठकः कथितवती यत् केंद्रम् अस्मिन् विद्यालये अस्ति अस्मद् विद्यार्थिषवपि संस्कारलहरी वर्धिष्यते कार्यमिदम् अत्यंतं प्रशंसनीयम् । तत्र प्रमोद मिश्रः ज्योतिष प्रशिक्षकः विपिन कुमार शास्त्री वेद पाठी विद्यार्थिनां शांति पाठेन कार्यक्रमः संपन्नः अवसरेस्मिन् समस्त विद्यालय परिवारः उपस्थितः अंते पौरोहित्य प्रशिक्षकः विपिन कुमार पाठकः सर्वेभ्यः आभारं व्यक्तीकृत्य कार्य समापनम् अकरोत्।

अस्माकं प्रेरणास्रोतः- स्व.पं०रामकिशोरशर्मा, स्व.पद्मश्री डॉ.रमाकान्तशुक्लः
परामर्शकाः-डॉ.बलदेवानन्दसागरः, डॉ.अरविन्दकुमारतिवारी, डॉ.राधेश्यामअवस्थी, प्रो.(डॉ.)अजितकुमारजैनः
सम्पादिका-मञ्जूशर्मा, सम्पादकमण्डलम् - डॉ.सुन्दरनारायणझा, डॉ.सुरेन्द्रमहतो, डॉ.विमलेन्दु कुमार त्रिपाठी, डॉ.संदीपकुमार उपाध्याय, धीरजमैठाणी, प्रबन्धसम्पादकौ-वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया लक्ष्यप्रिंटर्स,521/8 बी, भूतलं , वितिका सं. - 14, आदर्शमोहल्ला, मौजपुरनगरम् , देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-20/5534/2021-23 केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली अनुदानेन प्रकाश्यमानं पत्रमिदम्।